| 16. | डॉ. कैलाशचन्दमीणा | शिक्षा | 1 |
| 17. | डॉ. सुनीलकुमारशर्मा | शिक्षा | 1 |
| 18. | डॉ. इकुर्ती वेंकटेशवर्लुः | शिक्षा | 1 |
| 19. | डॉ. विचारीलालमीणा | शिक्षा | 1 |
| | | **योगः** | **20** |

## ङ. नामाङ्कितानां छात्राणां विवरणम् ( श्रेण्यनुसारम् )

| क्र. सं. | पाठ्यक्रमः | सामान्याः | | अनु. जातिः | | अनु.जन जातिः | | दिव्यांगवर्गः | | वंचितवर्गः | | अल्पसंख्यकाः | | आर्थिकरूपेण दुर्बलवर्गः | | योगः | | समस्त योगः |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| | | पु. | स्त्री | पु. | स्त्री | पु. | स्त्री | पु. | स्त्री | पु. | स्त्री | पु | स्त्री. | पु. | स्त्री | पु. | स्त्री | |
| 1 | स्नातकः (बी.एड.) स्नातकोत्तरम् | 57 | 44 | 22 | 45 | 17 | 13 | 2 | 0 | 56 | 81 | 0 | 0 | 43 | 17 | 197 | 200 | 397 |
| 2 | (एम.एड.) | 10 | 2 | 0 | 2 | 0 | 0 | 0 | 0 | 5 | 1 | 0 | 0 | 8 | 0 | 23 | 5 | 28 |
| 4 | विद्यावारिधिः | 37 | 14 | 7 | 2 | 1 | 0 | 0 | 0 | 4 | 3 | 0 | 0 | 11 | 4 | 60 | 23 | 83 |
| | योगः | 104 | 60 | 29 | 49 | 18 | 13 | 2 | 0 | 65 | 85 | 0 | 0 | 62 | 21 | 280 | 228 | 508 |



## च. संकायानुसन्धानप्रकाशनानि

| लेखकस्य नाम | शोधपत्रस्य शीर्षकम् | पत्रिकायाः शीर्षक/पीयर रिव्यूइंग/संपादित वॉल्यूम/प्रकाशित पुस्तकों/कार्यवाही में अध्याय/पेपर्स का शीर्षक | आईएसबीएन संख्या |
|---|---|---|---|
| प्रो. रमेशप्रसादपाठकः | हिन्दू दर्शन सनातन परम्परा | आकांक्षा पब्लिशिंग हाउस | 978-81-8370-66-5 |
| | शोध विधि और उपागम | कनिष्क पब्लिशिंग आउस | 978-93-89484-97-7 |
| | Aspects of Education | आकांक्षा पब्लिशिंग हाउस | 978-81-8370-659-9 |
| | योग शिक्षा-आरोग्य विज्ञान वैश्विक परिदृश्य | कनिष्क पब्लिशिंग आउस | 978-93-93322-41-8 |
| | राष्ट्रीय शिक्षा नीति-भारतीय शिक्षा का पुनरूत्थान | कनिष्क पब्लिशिंग आउस | 978-93-93322-54-8 |
| | The Management of Teaching Skills | कनिष्क पब्लिशिंग आउस | 978-81-972077-0-9 |
| | भारतीय शिक्षा परम्परा | शैक्षिक उन्मेष, केंद्रीय हिंदी संस्थान आगरा, | 2581-687X |
| | स्वामी श्रद्धानन्द के शैक्षिक विचारों की समसामयिक प्रासंगिकता | शोध प्रभा | 0974-8946 |
| | व्यक्तित्व निर्माण, तनाव प्रबंधन एवं वैशिक संवर्धन के संबंध में श्रीमद् भगवद्गीता की प्रासंगिकता | शैक्षिक उन्मेष, केंद्रीय हिंदी संस्थान आगरा | 2581-687X |
| | सनातन संस्कृति में प्रकृति संरक्षण की अवधारणा | शैक्षिक उन्मेष, केंद्रीय हिंदी संस्थान आगरा | 2581-687X |
| प्रो. रचनावर्मा | योगः मानसिकस्वास्थ्यञ्च | National Journal or Hindi & Sanskrit Research (Vol-52, Issue Jan-Feb, 2024) | 2454-9177 |
| | मिश्रितअधिगमस्य (Blended Learning) अवधारणा-संस्कृत-शिक्षायाः सन्दर्भे | National Journal or Hindi & Sanskrit Research (Vol-52, Issue Jan-Feb, 2024) | 2454-9177 |
| | तनावप्रबन्धने योगस्य उपयोगिता | Swami Vivekanand Advanced journal for research and studies (Vol-2, Issue 2, Jan-June, 2024) | 2584-105X |

| | | | |
|---|---|---|---|
| डॉ. विचारीलालमीना | समावेशी शिक्षा NEP 2020 के सन्दर्भ में | "IRJMSH" (Vol-14, Issue:6, June 2023) | 2277-9809 |
| | पंचतंत्र में मापन एवं मूल्याङ्कन | Anthology The Research (International Journal) (Vol. 8, Issue:10, Jan-2024 | 2456-4397 |
| डॉ. सुरेन्द्रमहतो | मनोविज्ञानम् आचार्य एवं ग्रन्थ | पी.जी डिप्लोमा-'संस्कृत साहित्य में विज्ञान', इग्नू, नई दिल्ली | e-journal |
| | धातु एवं रसायन विज्ञान | ई-ज्ञानकोश इग्नू | e-journal |
| | भाषा सीखना तथा भाषा के द्वारा सीखना | SCERT-दिल्ली पाठ्यक्रमान्तर भाषा पर आधारित स्व-शिक्षा सामग्री | 978-81-971630-7-4 |
| | श्रीमद् भगवद्गीता में निहित बुद्धि के स्वरूप का मनोवैज्ञानिक अध्ययन | जम्बू द्वीप (मई 2023) The e-journal of Indic studies (IGNOU) | 2583-6331 |
| | श्रीमद् भगवद्गीता में निहित बुद्धि के अवधारणा एवं प्रकारों का अध्ययन | शोध प्रभा वर्ष-48, अंक-3, जुलाई-सितम्बर, 2023 ई. | 0974-8946 |
| डॉ. अजयकुमार | वैश्विक स्तर पर शिक्षा और समाज के सहसंबंध का विश्लेषण | 'वैश्विक परिदृश्य में शिक्षा, साहित्य और समाज' हिन्दी केन्द्रीय विभाग, त्रिभुवन विश्वविद्यालय, नेपाल द्वारा प्रकाशित 2023 | 978-9937-9649-6-8 |
| | मूल्य अर्थ, प्रकृति और प्रकार | 'मूल्य एवं शांति शिक्षा', कालिंदी प्रकाशन, उ.प्र. 2023, | 978-81-966420-2-0 |
| | राष्ट्रीय शिक्षा नीति-1986 | 'भारतीय शिक्षा का इतिहास संकल्प प्रकाशन, 2023 | 978-93-91435-73-8 |
| | हिन्दी भाषा की अवधारणा और विकास | 'शिक्षाप्रियदर्शिनी' (अंक-18, जुलाई-दिसम्बर, 2023) | 2454-1230 |
| | A Study of Self-perception of adolescents in relation to academic achievement | A research paper published in TIJER& International Research Journal. Vol. 10, issue-8, Aug 2023 | 2349-9249 |
| डॉ. शिवदत्त-आर्य | अनुसंधान प्रविवेदन लेखन में प्रचलित मान्यताएं | Educreator Research Journal, Vol. X, Issue-V | 2455-0515 |
| | व्याकरणशास्त्रस्य संक्षिप्तेतिहासः' | शिक्षाप्रियदर्शिनी | 2454-1230 |
| | 'आत्मनिर्भर भारत निर्माण में | PVDT college of Education for | 978-93-57- |

| | | | |
|---|---|---|---|
| | भारतीय संस्कृति का योगदानः 21वीं सदी कौशल विकास के सन्दर्भ में | women Mumbai | 68-500-9 |
| | व्याकरणशिक्षणम् | अमर ग्रन्थ पब्लिकेशन्स, दिल्ली | 978-93-93671-35-6 |
| श्रीमती अनिता | प्रवर्तमानायाः उच्चशिक्षायाः प्रमुखाः समस्याः। | शोधशौर्यम्, Vol. 6, Issue-1 जनवरी-फरवरी 2023 | 2581-6306 |

## छ अवधौ विभागेन आयोजिताः कार्यक्रमाः

| क्र.सं. | विभागस्य नाम | कार्यक्रमस्य नाम | अवधिः |
|---|---|---|---|
| 1. | शिक्षाशास्त्रम् | 'आत्मनिर्भरभारतं राष्ट्रीयशिक्षानीति-2020 परिप्रेक्ष्ये' विषयक-राष्ट्रीया संगोष्ठी | 23 -24.02.2023 |

## शैक्षणिक

### सिंहावलोकनम्

शैक्षणिककार्याणां प्रभागः विश्वविद्यालयस्य केन्द्ररूपेण कार्यं करोति, शैक्षणिकनीतिः नियन्त्रयति, शैक्षणिककार्यक्रमान् सुचारुतया निष्पादयति। प्रतिबद्धता, एकं गतिशीलं शिक्षणसमुदायं पोषयितुं वर्तते यत्र नवाचारः उत्कृष्टता च उत्पद्यते।

### महत्त्वपूर्णदायित्वम्

- पाठ्यक्रमपरिवर्धनम्।
- गुणवत्ताऽऽश्वासनम्।
- छात्रसहकारिसेवाः।
- संकायविकासः।
- शैक्षणिकयोजना।

### प्रयासाः उपलब्धयश्च

शैक्षणिककार्याणां प्रभागः केषाञ्चन प्रमुखप्रयत्नानाम् उपलब्धीनां च प्रकाशनं कृत्वा गर्वितः अस्ति।

- **अन्तरविषयकार्यक्रमाः**- ज्ञानस्य परस्परसम्बद्धतायाः अन्वेषणार्थं छात्रान् प्रोत्साहयितुं नूतनानाम् अन्तरविषयकार्यक्रमाणाम् आरम्भः।
- **अनुसन्धासहयोगः**- छात्राणां संकायस्य च मध्ये शोधसहकार्यस्य सौविध्यं करोति तथा च विश्वविद्यालयस्य अन्तः सशक्तस्य शोधसंस्कृतेः विकासे योगदानं ददाति।

- **अन्ताराष्ट्रियप्रतिभागिता**- विश्वे प्रतिष्ठितसंस्थाभिः सह प्रतिभागिताद्वारेण वैश्विकसंपर्कस्य स्थापनया च छात्राणां संकायस्य च बहुमूल्यम् अन्ताराष्ट्रियम् अनुभवं प्रदातुं च भवति।

**संभाविदिशाः**

भाविकाले संभाव्यं दृष्ट्वा शैक्षणिककार्याणां प्रभागः एतेषु प्रतिबद्धः अस्ति-विविधानां हितानां पूर्त्यर्थं शैक्षणिककार्यक्रमाणां विस्तरः। शिक्षणपरिणामवर्धनार्थम् अत्याधुनिकशिक्षणपद्धतीनां प्रयोगः। अनुसन्धानस्य मूलभूतसंरचनायाः सुदृढीकरणं, जिज्ञासासंस्कृतेः प्रवर्धनं च।

## छात्रकल्याण

### सिंहावलोकनम्

छात्रकल्याणविभागः विश्वविद्यालयस्य केन्द्ररूपेण कार्यं करोति, यः सर्वेषां छात्राणां कृते सहायकं समावेशिनं वातावरणं पोषयितुं समर्पितः अस्ति। अत्र न केवलं शैक्षणिकविकासस्य अपितु प्रत्येकं व्यक्तेश्च व्यक्तिगतसामाजिकविकासस्य चापि प्रवर्धनम् उद्दिष्टम् अस्ति।

### महत्त्वपूर्णदायित्वम्

- छात्रसहकारिसेवाः।
- सांस्कृतिकाः पाठ्येतरक्रियाकलापाश्च।
- स्वास्थ्यं कल्याणप्रयत्नश्च।
- सामुदायिकसंलग्नता।
- आजीविकाविकासः।

**गतिविधयः -**

1. 25 तः 31 अगस्त, 2023 दिनाङ्के प्रो. यशीवरसिंहमहोदयस्य संयोजने 'संस्कृतसप्ताहः' आयोजितम्। डॉ. दिनेशयादवः डॉ. परमेशशर्मणौ सह-संयोजकौ आस्ताम्।
2. 27 अगस्त, 2023 दिनाङ्के डॉ. दिनेशयादवस्य संयोजने संस्कृत-आपणम् आयोजितम्।
3. 23-24 जनवरी, 2024 दिनाङ्कौ प्रो. शिवशंकरमिश्र संयोजने तथा डॉ. दिनेशयादवस्य सह-संयोजने 61तमी राज्यस्तरीयशास्त्रीयस्पर्धायाः आयोजिता।
4. 22 जनवरी, 2024 दिनाङ्के प्रो. शिवशंकरमिश्र संयोजने 'संस्कृतसङ्गमः' आयोजितम्।
5. 02 मार्च, 2024 दिनाङ्के डॉ. दिनेशयादवस्य संयोजने सरलमानकसंस्कृतम् कार्यशालायोजितम्।
6. 16 मार्च, 2024 दिनाङ्के डॉ. दिनेशयादव संयोजने तथा डॉ. आरतीशर्मवर्याः सह-संयोजने संस्कृतशिक्षणशास्त्र कार्यशाला संस्कृत-अकादमेः संयुक्त तत्त्वावधाने आयोजितम्।


सरलमानकसंस्कृतम्


श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः


GPS Map Camera
New Delhi, Delhi, India
G5RM+95P, Block B, Qutab Institutional Area, New Delhi, Delhi 110016, India
Lat 28.541003°
Long 77.182789°
28/08/23 12:22 PM GMT +05:30
Google

# केन्द्राणि


केन्द्राणि
शिक्षण-अधिगमकेन्द्रम्
महिला अध्ययन-केन्द्रम्
सङ्गणककेन्द्रम्
स्वास्थ्यसंरक्षणकेन्द्रम्

# शिक्षण-अधिगम-केन्द्रम्






## क. केन्द्रविषये

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयस्य शिक्षणाधिगमकेन्द्रस्य स्थापना 2017 तमे वर्षे भारतसर्वकारस्य शिक्षामन्त्रालयेन पाण्डितमदनोहनमालवीयराष्ट्रियशिक्षकमिशन इति शिक्षणयोजनायाः अन्तर्गतत्वेन विहिता। अस्य केन्द्रस्य दृष्टिकोणं शिक्षणाधिगमप्रणालीनां डिजाइन-विकास-कार्यान्वय-मूल्याङ्कनादीनां भाषाशिक्षा प्रदीयते। विशेषरूपेण संस्कृतसम्बद्धशिक्षकाणां शिक्षकप्रशिकाणां कौशलानां दक्षतानां च विकासः वर्तते। 2017 तमे वर्षे केन्द्रस्य स्थापनायाः अनन्तरं केन्द्रस्य नेतृत्वं प्रो. अमितापाण्डेयभारद्वाजवर्या करोति।

सप्तमे चरणे (2023-24) तमे 2023 तमस्य वर्षस्य अक्टूबर मास पर्यन्तं केन्द्र द्वारा ऑनलाइन माध्यमेन नवानां (09) कार्यक्रमाणां सफलतापूर्वकायोजनम् उच्चशिक्षायाः प्रतिष्ठित संस्थानानाम् 69 विषयविशेषज्ञानां योग्य मार्गदर्शने अभवत्, यैव देशस्य सर्वेभ्यः राज्येभ्यः केन्द्रशासित प्रदेशेभ्यश्च 1099 प्रतिभागिनः लाभान्वितः अभवत्। एषु 09 कार्यक्रमेषु 06 व्याख्यानाः रा.शि.नी. 2020 आधारिताः, 01 द्विसाप्ताहिक ऑनलाइन राष्ट्रीयसंकायविकासकार्यक्रमः (एफ.डी.पी.), एकसाप्ताहिक ऑनलाइन-राष्ट्रीयसंकायविकासकार्यक्रमः (एफ.डी.पी.) एवञ्च एकः एकमासिक ऑनलाइन संकायानुबोधनकार्यक्रमः विश्वविद्यालयानां छात्रेभ्यः अध्यापकेभ्यश्च आसन्। एतेषां कार्यक्रमाणां विवरण तेषां विषय-अवधि-दिनाङ्क-कार्यक्रमप्रकार-स्तर-विषयविशेषज्ञ-प्रतिभागिनां संस्था सहितः निम्नतालिकायां प्रस्तुतः अस्ति।

## टी.एल.सी.केन्द्र द्वारा आयोजितकार्यक्रमाणां विवरणम्
### (दिनांक 01 अप्रैल, 2023 तः 30 अक्टूबर, 2023 पर्यन्तम्)

| क्र.सं. | कार्यक्रम का प्रकार | विषय | दिनांक | अवधि दिनों में | प्रतिभागियों की संख्या |
|---|---|---|---|---|---|
| 1. | एफ.डी.पी. | अधिगम परिणाम एवं उद्देश्य: अभिकल्प एवं निर्माण | 24-28 अप्रैल, 2023 | 05 | 52 |
| 2. | एफ.डी.पी. | तकनीकी शिक्षणशास्त्रीय एवं शोध कुशलता संवर्द्धन | 29 मई से 08 जून, 2023 | 10 | 123 |
| 3. | एफ.डी.पी. | संकाय विकास कार्यक्रम | 13 जुलाई से 11 अगस्त, 2023 | 30 | 46 |
| 4. | व्याख्यानमाला | भारतीय ज्ञान प्रणाली एवं दर्शन : राष्ट्रीय शिक्षा नीति 2020 | 22 अप्रैल, 2023 | 01 | 103 |
| 5. | व्याख्यानमाला | भारतीय ज्ञान प्रणाली एवं समाजशास्त्र: राष्ट्रीय शिक्षा नीति 2020 | 18 मई, 2023 | 01 | 85 |
| 6. | व्याख्यानमाला | भारतीय ज्ञान प्रणाली एवं मनोविज्ञान: राष्ट्रीय शिक्षा नीति 2020 | 13 जून, 2023 | 01 | 206 |
| 7. | व्याख्यानमाला | भारतीय ज्ञान प्रणाली एवं प्रबन्धन : राष्ट्रीय शिक्षा नीति 2020 | 12 अगस्त, 2023 | 01 | 183 |
| 8. | व्याख्यानमाला | भारतीय ज्ञान प्रणाली एवं सुस्थित जीवन शैली: राष्ट्रीय शिक्षा नीति 2020 | 29 अगस्त, 2023 | 01 | 157 |
| 9. | व्याख्यानमाला | भारतीय ज्ञान प्रणाली एवं पर्यावरण शिक्षा: राष्ट्रीय शिक्षा नीति 2020 | 18 अक्टूबर, 2023 | 01 | 144 |
| | | | **कुल प्रतिभागी** | | **1099** |



## शिक्षण-अधिगम-केन्द्रे कार्यरतकर्मचारिणां विवरणम् ( पदवार )

| क्र.सं. | पद नाम | कर्मचारिणां संख्या |
|---|---|---|
| 1. | परियोजनाप्रमुखः | 01 |
| 2. | प्राध्यापकसदस्याः | 02 |
| 3. | प्रशासनिकाधिकारी | 01 |
| 4. | लेखाधिकारी | 01 |
| 5. | सङ्गणकसहायकः | 01 |
| 6. | कनिष्ठलिपिकः | 01 |
| 7. | बहुकार्यकर्मचारी | 01 |

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयस्य (केन्द्रीयविश्वविद्यालयस्य) मालवियमिशन-शिक्षकप्रशिक्षण केन्द्रस्य (M.M.T.T.C.) (पूर्वेशिक्षणाधिगम केन्द्रस्य T.L.C.) स्थापना 2023तमे वर्षे विश्वविद्यालयानुदान आयोगेन (U.G.C.) शिक्षामन्त्रालयेन भारतसर्वकारेण कृता। अस्य केन्द्रस्य मुख्योद्देश्यम् उच्चशिक्षासंकायसदस्येषु N.E.P. 2020 इत्यस्यानुरूपेण उच्चतमशिक्षणम्, अधिगमाय अनुसन्धाय च दक्षतानां कौशलानाञ्च विकासः करणीयः। उच्चशिक्षायाः सर्वस्तरेषु संकाय क्षमतासंवर्धनाय गुणवत्तायाः उत्कृष्टतायाः च प्रमुख क्षेत्रेषु केन्द्रमिदम् प्रमुखं स्थानं भजते। यस्य विश्वविद्यालयानुदानायोगस्य, HRDC, पण्डितमदनमोहनमालवीय राष्ट्रीय शिक्षक प्रशिक्षण योजनायाः अन्तर्गतत्वेन सञ्चालित-विभिन्नकेन्द्रेः विभिन्नकार्यक्रमाणां माध्यमेन सुष्टुतया सञ्चाल्यते। भौतिकीय मानवीय संसाधनानां इष्टतम प्रयोग दृष्ट्या शिक्षामन्त्रालय द्वारा U.G.C. इत्यस्य HRDC एवं पंडितमदनमोहनमालवीयराष्ट्रियशिक्षक-प्रशिक्षण योजनायाः अन्तर्गतत्वेन स्थापित केन्द्राणां समञ्जनाय एकीकरणाय दृढाधारप्रदानाय च N.E.P. 2020 इत्यस्य प्रभावी क्षमता संवर्धन प्रयासाय मालवीयमिशन इतिनामक लोकप्रिय कर्तुं MMTTP इति माध्यमेन अस्योद्घाटनम् माननीयशिक्षामन्त्रिणा श्रीधर्मेन्द्रप्रधानमहाभागेन सितम्बर मासस्य 5 दिनाङ्कः 2023तमे वर्षे कृतम्। अस्याः योजनायाः क्रियान्वयनाय 111 उच्च शिक्षासंस्थानेषु 66 HRDC, 45 PMMMNT केन्द्राणां स्थापना कृता। यत्र अस्मद् केन्द्रं प्रामुख्यं भजते। अस्य केन्द्रस्योद्घाटनम् U.G.C. इत्यस्य माननीयः अध्यक्षः एम.जगदीशकुमारः अक्टूबरमासस्य 30 दिनाङ्के 2023तमे वर्षे अकरोत्

केन्द्रेण अष्टानाम् ऑनलाइनराष्ट्रियानां **नवशिक्षानीत्याधुनिकत्याताभिमुखीकरणसंवेदीकरण-कार्यक्रमाणां** सफलतापूर्वकम् आयोजनं विहितम्। अस्य कार्यक्रमस्य मुख्योद्देश्यं नारीशिक्षानीतेः प्रभाविकार्यान्वयनाय प्रतिभागिनां नवशिक्षानीतेः 2020 प्रमुखलविषयाणां बोधनम् उन्मुखीकरणं च वर्तते। कार्यक्रमाः गूगलमीट् इति माध्यमेन ऑनलाइनमोड द्वारा आयोजिताः।

कार्यक्रमस्यादौ केन्द्रस्य प्रमुखा **अमितापाण्डेयभारद्वाजः** प्रतिभागिनः स्त्रीगतपुरस्सरं प्रमुखविषयाणां निर्देशनपूर्वकं समेषां स्वागतं कृतवती। एतेषां 8 कार्यक्रमाणां निमित्तं एम्.एम्.टी.टी.पी. पोर्टल इत्यत्र आहत्य 655 प्रतिभागिनः पञ्जीकरणं कृतवन्तः। यत्र 529 प्रतिभागिनः साफल्येन कार्यक्रम परिसमापितवन्तः। कार्यक्रमाणां विवरणं दिनाङ्कानुगुणं पञ्जीकृतप्रतिभागिनां सूच्यनुसारं तालिकायां प्रस्तुतं वर्तते।

## एम.एम.टी.टी.सी. केन्द्र द्वारा नवम्बर, 2023 तः मार्च, 2024 यावत् आयोजितकार्यक्रमाः (चरणम्- VII)

| कार्यक्रम सं. | दिनांकः | पंजीकृतप्रतिभागि सं. | लाभार्थी सं. |
|---|---|---|---|
| 1. | 13 तः 22 नवम्बर, 2023 | 25 | 25 |
| 2. | 18 तः 28 दिसम्बर, 2023 | 98 | 83 |
| 3. | 02 तः 11 जनवरी, 2024 | 80 | 56 |
| 4. | 15 तः 24 जनवरी, 2024 | 110 | 77 |
| 5. | 05 तः 14 फरवरी, 2024 | 113 | 113 |
| 6. | 19 तः 28 फरवरी, 2024 | 104 | 77 |
| 7. | 06 तः 15 मार्च, 2024 | 58 | 44 |
| 8. | 13 तः 22 मार्च, 2024 | 67 | 54 |
| | **कुल** | **655** | **529** |



एम्.एम्.टी.टी.पी. सूचना-विवरणिकानुसारं 8 प्रमुख NEO विषयकाणां पूरणाय समेषां कार्यक्रमाणां 16 सत्रेषु सञ्चालनं कृतम्। समग्रबहुविषयकशिक्षा, भारतीयज्ञानप्रणाली, शैक्षणिकनेतृत्वम्, शासनप्रबन्धनं, अनुसन्धानं विकासः, उच्चशिक्षा समाजः, कौशलविकासः, छात्रविविधता, समावेशिशिक्षा, सूचना संचारप्रौद्योगिकी च आसन्।

## मालवीयमिशनशिक्षणाधिगमकेन्द्रे कार्यरतकर्मचारिणां विवरणम् (पदक्रमेण)

| क्र.सं. | पद नाम | कर्मचारिणां संख्या |
|---|---|---|
| 1. | निदेशकः | 01 |
| 2. | प्राध्यापकसदस्यौ | 02 |
| 3. | प्रशासनिक-अधिकारी | 01 |
| 4. | लेखा-अधिकारी | 01 |
| 5. | परियोजनासहायकः | 01 |
| 6. | कंप्यूटरसहायकः | 01 |
| 7. | सहायककर्मचारी | 01 |

# महिला-अध्ययन-केन्द्रम्

## क. केन्द्रविषये

महिलाध्ययनकेन्द्रस्य स्थापना 2005 तमे वर्षे दशमयोजनायाः अन्तर्गत्वेन कृता। संकायसदस्यानां नियुक्तिः मार्चमासे 2006 तमे वर्षे कृता। केन्द्रम् अप्रैलमासे 2006 तमे वर्षे स्वकार्यं समारब्धवत्। श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः महिलाध्ययनकेन्द्रयुक्तः एकमात्रं गौरवप्राप्तं संस्कृत-विश्वविद्यालयः वर्तते। अधुना केन्द्रस्य अध्यक्षतां प्रो. मीनूकश्यपवर्या कुरुते।

संस्कृतविश्वविद्यालयस्य पारम्परिकवातावरणे महिलाध्ययनकेन्द्रस्य काचिद् विशेषा कार्यसूची वर्तते।





## ख. केन्द्रस्योद्देश्यानि-

- भाारतीयमहिलानाम् अतीतगौरवसम्मानानां पुनर्जीवनम्।
- गतसमयस्य महिलानां उपलब्धीनां पूर्णतानाम् अनुकरणाय आकर्षरूपेण उपस्थापनम्।
- महिलाध्ययनदृष्ट्या प्राचीनग्रन्थानाम् अवलोकनम्।

## ग. कार्यक्रमस्य आयोजनम्-

| क्र.सं. | कार्यक्रमनाम | दिनाङ्कः |
|---|---|---|
| 1. | दशदिवसीयजेंडर संवेदीकरणफाउंडेशनकोर्स (शिक्षाशास्त्री प्रथमवर्षीयच्छात्राणां कृते) | 20-4-2023तः 03-05-2023 पर्यन्तम् |
| 2. | स्वतन्त्रतायाः अमृतमहोत्सवोपलक्ष्ये प्रतियोगिताः | 14-08-2023तः 21-08-2023 पर्यन्तम् |
| 3. | जेंडर संवेदीकरणकार्यशाला (शिक्षाचार्य-प्रथमवर्षीयच्छात्राणां कृते) | 26-02-2024 |

| | | |
|---|---|---|
| 4. | महिलास्वास्थ्यजागरूकताकार्यक्रमः | 05-03-2024 |
| 5. | अन्താराष्ट्रियमहिलादिवसोपलक्ष्ये प्रतियोगिताः | 01-03-2024तः<br>06-03-2024 पर्यन्तम् |
| 6. | मानसिकस्वास्थ्यजागरूकताकार्यक्रमः | 21-03-2024 |
| 7. | दशदिवसीयजेंडरसंवेदीकरणफाउंडेशनकोर्स | 12-02-2024तः<br>23-02-2024 पर्यन्तम् |

# सङ्गणककेन्द्रम्

## क. केन्द्रविषये

विश्वविद्यालयस्य संगणककेन्द्रं विगतवर्षेषु परिसरे तकनीकिसम्बद्धसेवानां केन्द्ररूपेण कार्यं कृतवत्। विश्वविद्यालयस्य सॉफ्रटवेयर-विकासे कम्प्युटरकेन्द्रस्य महत्त्वपूर्णा भूमिका वर्तते। केन्द्रं विश्वविद्यालयस्य सर्वेभ्यः संकायसदस्यानां कर्मचारिणां छात्रणां कृते विविधसेवाः प्रददाति। विश्वविद्यालयस्य संगणककेन्द्रं व्यापक-अन्तर्जालेन सह आईटी-आवश्यकतायै विशिर्षस्थितौ वर्तते। केन्द्रमिदम् एकडेटासेन्टर, उच्चनिष्पादनं, संगणकसौविध्यं, प्रशिक्षणकेन्द्रम्, अत्याधुनिकसर्वर, भण्डारण-विभिन्न-उन्नत-एप्लिकेशनसाफ्रटवेयर इत्यादीनां सैविध्यं प्रददाति। संगणककेन्द्रम् विश्वविद्यालयस्य (जी.बी.पी.एस. फाइबर-ऑप्टिक नेटवर्क) इति व्यापकवेगवत् कर्तुं प्रयतते। केन्द्रं सर्वान् शैक्षणिकविभागान् छात्रवासं पुस्तकालयानां भवनानि अन्यकेन्द्राणि च सौविध्येन योजयति। संगणककेन्दम् ई-केम्पससौविध्यं प्रददाति। यत्र अन्तर्जालं सम्मिलितं वर्तते। यच्च उच्चगतिना सह निर्बाधसक्रियतया 24x7 इत्यर्थे उद्घटितं वर्तते। प्रयोगशाला, छात्रवासः, पुस्तकालयश्च वायर्ड-गीगाबिट-लैन-कनेक्टिविटि-वायरलेस-एक्सेस-पॉइंटादीनां माध्यमेन संगणकीय-सौविध्यं प्रददाति। केन्द्रेण विश्वविद्यालयपरिसरः वाईफाई इति समक्षमरूपेण ई-कैम्पस प्रमाणेन परिणीतः।






संगणककेन्द्रं विश्वविद्यालयसमुदायाय संगणकीयसौविध्यम्, प्रशिक्षणम्, शिक्षणम्, ई-मेल, वेबसाइट-होस्टिंगविकास-प्रबन्धनम् इत्यादिगुणवत्तापूर्ण-सौविध्यं प्रददाति। अत्र शोधकर्तारः मूल्ययुक्तप्रदत्तविश्लेषणे साहाय्यं प्राप्नुवन्ति। विश्वविद्यालये अन्तर्जालसौविध्यानां विस्तारः कृतोऽस्ति। वर्ल्ड-वाइड-वेब इति यावत् सामर्थ्यं सक्षमता प्राप्ता। विभिन्नपाठ्यक्रमच्छात्राणां कृते प्रयोगशालासौविध्यं प्रदीयते।

## ख. वर्तमानम् आईटी-भौतिकसंसाधनम्

- विश्वविद्यालयस्य पार्श्वे अन्तर्जाल-एक्सेस इत्यनेन सह सम्यक् सुसज्जिताः तिस्रः वातानुकूलित-प्रयोगशालाः सन्ति। छात्राणाम् अधिगमनाय कौशलेषु परिष्काराय नवारणाह्वाहनानि सज्जीकर्तुं पाठ्यक्रमस्यानुसारं विभिन्नशिक्षणोपकरणं रक्षितम्। यथा- इण्टरैक्टिव-बोर्ड, एलसीडीटीवी, मल्टीमीडिया, प्रोजेक्टर विभिन्नशेक्षिकसॉफ्टवेयर् इत्यादीनाम् उपयोगः क्रियते।
- विश्वविद्यालये 126 संगणकानि अन्यावश्यकानि आईसीटी-उपकरणानि, तत्र शिक्षाविभागाय भाषाप्रयोगशाला, शैक्षणिकप्रौद्योगिकीप्रयोगशाला, संगणकप्रयोगशाला इत्यादयः प्रयोगशालाः सन्ति।
- एतदतिरिक्तम् अनुसन्धानच्छात्राणाम् उपचारात्मक-नेट-पाठनकक्षायै आईसीटी-उपकरणानि स्मार्टकक्षाः च उपस्थापिताः।
- विश्वविद्यालयस्य कार्यक्रमाणाम् आयोजनाय स्वर्णजयन्तीसदने भूमितले इण्टरैक्टिवपैनलद्वयं स्थापितम्।
- विश्वविद्यालये शिक्षामन्त्रालयस्य एनकेएन-प्रोजेक्ट इत्यनुसारेण 1.0 जी.वी.पी.एस पीआरआई-इण्टरनेट कनेक्टिविटि इत्यादिभिः सह अन्तर्जालसौविध्यं कृतम् अस्ति। अत्र छात्राः संकायाः, अनुसन्धानकर्तारः सर्वविभागानां विभिन्नस्रोतोभ्यः, विविधप्रकारकसूचनाः प्राप्तुं सामग्रीसंकलने च साहाय्यं प्राप्नुवन्ति।
- परिसरे अन्तर्जाल-वाईफाई-समुपलब्धता-विश्वविद्यालये शिक्षामन्त्रालयस्य दिशानिर्देशानाम् अनुसारेण जियो-नेटवर्क-माध्यमेन छात्राः, संकायाः, विभागाः वाईफाई-सौविध्यं प्राप्नुवन्ति। विश्वविद्यालये इण्टरनेट-सेवा नेटवर्कमूलसंरचना च उपलभ्यते।
- विद्यालयः एमओओसी-यूजीसी इत्यस्य स्वयं पोर्टलनिमित्तं विभिन्नविषयेषु चलच्चित्रव्याख्यान-संरक्षणाय वर्चुअल-ईकक्षोऽपि स्थापितोऽस्ति।
- विश्वविद्यालयस्य त्रिभाषी अन्तर्जालसङ्केतः संस्कृत-हिन्दी-अंग्रेजी-संस्करणेषु अनुरक्ष्यते। काले-काले इनहाउसविधिना अद्यतनः क्रियते।
- विश्वविद्यालये 550 एक्सटेंशन-डिजिटल-एनालॉग-लाइन इत्यादिभिः सह ईपीएवी एक्ससौविध्यमपि वर्तते।

## ग. सङ्गणककेन्द्रेण प्रदीयमानानि सामान्यसौविध्यानि

सङ्गणक-केन्द्रं विश्वविद्यालयाय सङ्गणकीय-सौविध्येषु, विद्युत्सङ्केतः (e-mail), अन्तर्जालीयायोजनम् (website hosting), विकासः प्रबन्धनञ्च इत्यादिषु गुणवत्तापूर्णां सेवां प्रददाति। एतत् केन्द्रं शोधकर्तृभ्यः तेषां बहुमूल्यदत्तांशविश्लेषणे सहायकं भवति, विश्वविद्यालये अन्तर्जालसौविध्यानां विस्तारं करोति, विश्वजालस्य प्रवेशं सक्षमयति, विश्वविद्यालयस्य छात्राणां कृते प्रयोगशालासौविध्यानि च प्रददाति। इदं केन्द्रं विश्वविद्यालयस्य अधोलिखितावश्यकताः पूरयति।

**जेम् इत्यस्य माध्यमेन विश्वविद्यालये सर्वेषां सूचनाप्रौद्योगिकीमूलसंरचनानां क्रयणं स्थापना च।**

एतेषां एएम्सी सहितं सर्वेषां सङ्गणकानां, आनुषङ्गिकसामग्रीणां, जालकृतीनां च परिपालनकरणम्।

- विश्वविद्यालयस्य सामाजिकमाध्यमपुटलेखानाम् अर्थात् यूट्यूब, फेसबुक, ट्विटर इत्यादीनां प्रबन्धनम्।
- विश्वविद्यालयस्य सर्वेषां विविधजालवितरकस्य अनुरक्षणम्। (Server management)
- विश्वविद्यालयस्य विभिन्नशिक्षण-शिक्षणेतरविभागेषु, कर्मचारिनिवासस्थानेषु, छात्रावासे, अतिथिगृहेषु इत्यादिषु अन्तर्जाल-प्रवेशप्रदानम्।
- विभिन्नविभागेषु, छात्रावासे, कर्मचारिणाम् आवासेषु, अतिथिगृहे इत्यादिषु दूरसञ्चारसौविध्यानां प्रदानं तथा च सञ्चारप्रणालितन्त्रांशानां प्रबन्धनम्।
- विश्वविद्यालयस्य जालकृतीनां बाह्यभञ्जकैः संरक्षणं, जालकृतिषु भाराणां सन्तुलनम्, अनपेक्षित-सम्मर्दानां शोधनम्, अवाञ्छितानाम् अन्तर्जालीयसामग्रीणाम् अवरोधनं तथा च प्राथमिकतां निर्दिश्य जालकृतेः सम्मर्दानां सुव्यवस्थितं कर्तुं दहनदुर्गप्रणाल्याः प्रबन्धनम्।
- विश्वविद्यालये कार्यं कुर्वतां कर्मचारिणां जालकृति-दूरसंचार-यन्त्रांशसम्बद्धानां समस्यानां समाधान-करणम्। सूचनाप्रौद्योगिक्या आधारभूतसंरचनायाः प्रबन्धनम्, विश्वविद्यालयप्रयोगशालानां संजाल-सम्बद्धानां विषयाणां समाधानम्।
- विश्वविद्यालये नियोजितैः अभियन्त्रणकर्मचारिभिः पद्धतेः यन्त्रांशस्य च आन्तरिकसम्यक्करणम्।
- विश्वविद्यालयस्य कर्मचारिणः छात्राः च कुत्रापि स्थित्वा स्वस्य विद्युत्सङ्केतलेखानां प्रवेशं कर्तुं सङ्केततन्त्रांशस्य साहाय्येन जालवितरकस्य प्रशासनं कर्तुं प्रभवेयुः।
- प्रतिलिखितम् (Backup) पुनर्प्राप्तिश्च (Recovery)-भण्डारण/सञ्चिकाजालवितरके उपयोक्तृभिः गृहनिर्देशिकानां साप्ताहिकरूपेण प्रतिलेखनं क्रियते।
- सङ्गणककेन्द्रेण विश्वविद्यालये समर्थद्वारिकायाः (Samarth Portal) विद्युत्परिपालन- (e-governance) परियोजनायाः च कार्यान्वयनम् आरब्धम् अस्ति तथा च प्रवेशः, प्रवेशघटकाः (input modules) चेत्यादीनां सफलतया आरम्भः कृतोऽस्ति।

- सङ्गणककेन्द्रं AISHE द्वारिकायां (Portal), केन्द्रियविश्वविद्यालयद्वारिकायाञ्च (Portal) इत्यादिषु दत्तांशानां प्रबन्धनम्, उपारोपणं च करोति।

विश्वविद्यालयस्य आधिकारिकजालस्थलस्य प्रबन्धनम्- विश्वविद्यालयेन सह सम्बद्धानां सामान्यसूचनानाम् अतिरिक्तं विश्वविद्यालयस्य जालस्थल-उपयोक्तृभ्यः निम्नलिखितसौविध्यानि प्रदत्तानि सन्ति।

- ➢ विश्वविद्यालयस्य जालपुटं त्रिभाषिकम् वर्तते, अर्थात् संस्कृतभाषायां, हिन्दीभाषायाम्, आङ्ग्ल-भाषायाञ्च अस्ति।
- ➢ विकाशनम् (निविदा) आजीविका (कैरियर्) च- उद्धरणस्य/विकाशनानाम् उद्योगविज्ञापनानां प्रकाशनम्।
- ➢ विभिन्नप्रकाराणां, पत्र-परिपत्र-अधिसूचनादीनां प्रकाशनम्।
- ➢ ई-संसाधनम्- संकायाध्यापकानां छात्राणां च कृते जे-गेट्, शोधगङ्गा इत्यादीनां ई-संसाधनानाम्/पत्रिकाणां उपलब्धीकरणं यत् तेषां शोधकार्यस्य कृते उपयोगि स्यात्।
- ➢ पूर्वविद्यार्थिनः पञ्जीकरणम्- विश्वविद्यालयस्य पूर्वविद्यार्थिनः जालस्थलमार्गेण स्वयमेव पञ्जीकरणं कर्तुं शक्नुवन्ति।
- ➢ प्रवेशसम्बद्धसूचना- जालस्थलप्रवेशप्रक्रियया सम्पूर्णसूचनायाः, प्रवेशपरीक्षायाः, परिचयनियमावल्याः, अन्यसम्बद्धसूचनायाः, आवेदनपत्रस्य, परिणामस्य च पूर्णं विवरणं प्रदीयते।
- ➢ जालस्थलमाध्यमेन विद्यमानाः सूचनाः- विश्वविद्यालयस्य सम्बद्धविभागानाम् आग्रहानुसारं सङ्गणककेन्द्रेण आन्तरिकरूपेण अद्यतन्यः क्रियन्ते।

## घ. प्रशिक्षणं पाठ्यक्रमः

सङ्गणककेन्द्रं विभिन्नविषयेषु पारम्परिकसङ्गणकपाठ्यक्रमाणाम् अतिरिक्तछात्राणां, शोधसहकारिणाम्, अध्यापन-शिक्षणेतर-कर्मचारिणां कृते तेषां सङ्गणकक्षमतानाम् एवञ्च तेषामुद्योगेषु आवश्यकतानुसारं विभिन्नतन्त्रांशानां ज्ञानवर्धनं कर्तुं प्रशिक्षणकार्यक्रमान् चालयति।

## ङ. प्रमाणपत्रम् उपाधिपत्रं- (डिप्लोमा) पाठ्यक्रमश्च -

सङ्गणककेन्द्रं व्यावसायिककौशलं ज्ञानं च वर्धयितुं विश्वविद्यालयस्य राजस्वं च प्राप्तुं सप्ताहान्ते (शनिवासरे रविवासरे च) कार्यरतव्यावसायिकानां छात्राणां च कृते निम्नलिखितस्ववित्तपोषितान् षाण्मासिकान् अंशकालिकान् उपाधिपत्र (डिप्लोमा)सङ्गणकपाठ्यक्रमान् चालयति।

- सङ्गणकानुप्रयोगे (Computer Application) उपाधिपत्रम् (डिप्लोमा)।
- जालपरिकल्पना (Web Designing) इत्यस्मिन् प्रमाणपत्रम्।
- सङ्गणकविधिलेखनप्रक्रिया (Computer Programming) इत्यस्मिन् प्रमाणपत्रम्।
- कार्यालयस्वचालने (Office Automation) प्रमाणपत्रम्।

## च. प्रशिक्षणकार्यक्रमः

सम्पूर्णे कोविड्-१९ महामारी-काले सङ्गणक-केन्द्रेण गूगल-मीट्-माध्यमेन जालाधारितकक्षां गृहतां शिक्षकाणां कृते जालाधारित-पाठ्यक्रमाः, लघु-प्रशिक्षण-सत्राणि च क्रियन्ते स्म, तथैव अन्येषां कर्मचारिणां सदस्यानां कृते जालाधारित-समागमेषु सम्मेलितुं सौविध्यं च दत्तम् आसीत्। तदतिरिक्तं सङ्गणककेन्द्रं सर्वेषां विश्वविद्यालयकर्मचारिणां शोधसहकारिणां च कृते अल्पकालीनसङ्गणकप्रशिक्षणकार्यक्रमं चालयति यत् तेषां सङ्गणकसम्बद्धविशेषज्ञतायाः समस्यानां समाधानं च कर्तुं साहाय्यं करोति।

## छ. सङ्गणककेन्द्रे निम्नलिखितशिक्षणेतर कर्मचारिणः पदस्थापिताः वर्तन्ते-

| क्र.सं. | पदस्य नाम | कर्मचारिणां संख्या |
|---|---|---|
| 1. | कार्यकारिप्रबन्धकः | 01 |
| 2. | सहायकपरिचरः | 01 |
| 3. | तकनीकीसहायकः | 02 |
| 4. | प्रयोगशालापरिचरः | 01 |

## ज. भविष्ये सम्भावि

सर्वेषां विभागानां कम्प्यूटरीकरणाय विश्वविद्यालयप्रबन्धनप्रणालीसॉफ्टवेयरं (ई-समर्थगवर्नेन्स सूट् तथा आन्तरिकानुप्रयोगाः) आंशिकरूपेण विश्वविद्यालयेन कार्यान्वितम् तथा च निकटभविष्ये सङ्गणककेन्द्रं समर्थ-परियोजनां पूर्णतया कार्यान्वितं करिष्यति।

# स्वास्थ्यसंरक्षणकेन्द्रम्





## क. भूमिका

विश्वविद्यालये श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविश्वविद्यालयीयस्वास्थ्यकेन्द्रं विश्वविद्यालयस्य महत्त्वपूर्णकेन्द्ररूपेण कार्यं करोति, यत्र रक्तस्य, यकृतस्य, गुर्दाकार्यस्य च परीक्षणं कर्तुं सुसज्जिता अत्याधुनिकप्रयोगशाला अस्ति। अस्माकं स्वास्थ्यसेवाव्यावसायिकानां समर्पिते दले पञ्च विशेषज्ञवैद्याः सन्ति ये आयुर्वैदिकचिकित्सया सह एलोपैथिकविषये कुशलाः सन्ति, तथैव एकः चिकित्सासहायकः अपि अस्ति यः 24/7 समयेषु आपत्कालीनस्थितौ कार्यं कर्तुं प्रवीणः। अस्माकं सम्माननीयदलस्य सदस्येषु अंशकालिकचिकित्साधिकारी डॉ. के.एल्. ठाकुरः, यः स्त्रीरोगचिकित्सकः, दन्तचिकित्सकः, आयुर्वेदिक-होमियोपैथिक-चिकित्सा-चिकित्सश्च विविधविशेषज्ञसमूहस्य नेतृत्वं करोति। तेषां संयुक्तविशेषज्ञता विश्वविद्यालयसमुदायस्य कृते व्यापकस्वास्थ्यसेवाः सुनिश्चिनोति। स्वास्थ्यकेन्द्रे लाभार्थिनां सौकर्यार्थं सप्ताहे द्विवारं नियमितप्रयोगशालाद्वारा प्रतिदर्शसंग्रहणस्य सौविध्यं विद्यते। एतत् समुपलब्धसौकर्यं छात्राणां, शिक्षकाणां, कर्मचारिणां च कृते विस्तरितम् अस्ति, अहोरात्रं सेवालाभः प्राप्यते। अस्माकं सौविध्यानाम् उपयोगः विश्वविद्यालयेन समये समये समीक्षितः भवति तथा च स्थापितानां नीतीनाम् अनुपालनेन च भवति।

## ख. निम्नलिखितचिकित्सकद्वारा केन्द्रमिदं सेवते

| | |
|---|---|
| • डॉ. के.एल.ठाकुरः | (चिकित्साधिकारी) |
| • डॉ. मोनिका शर्मा | (स्त्रीरोगविशेषज्ञा) |
| • डॉ. नवनीशमनोचा | (दन्तरोगविशेषज्ञः) |
| • डॉ. स्वातित्यागी | (आयुर्वेदिकः) |
| • डॉ. वनीताकुमारः | (होम्योपैथिकः) |

# प्रकोष्ठाः निकायाश्च


प्रकोष्ठाः निकायश्च
प्रकोष्ठाः
आन्तरिकगुणवत्ता-ऽऽश्वासनप्रकोष्ठः
नियुक्तिः परामर्शप्रकोष्ठः
वृत्तिपरामर्शप्रकोष्ठः
समानावसरप्रकोष्ठः
प्रकाशनम्
अनुसूचितजाति/ अनुसूचितजनजातिप्रकोष्ठः
निकायाः
राष्ट्रीयच्छात्रसेना ( एन.सी.सी. )
राष्ट्रीयसेवायोजना ( एन.एस.एस. )

# प्रकोष्ठाः निकायाश्च

## आन्तरिकगुणवत्ताऽऽश्वासनप्रकोष्ठः (आईक्यूएसी)

आन्तरिकगुणवत्ताऽऽश्वासनप्रकोष्ठस्य (IQAC) स्थापना विश्वविद्यालयस्य उत्कृष्टतां प्रति प्रयत्नानाम् उपायानां च प्रसारणं सुव्यवस्थितं च कर्तुं, तथा च विश्वविद्यालयस्य शैक्षणिकप्रशासनिकप्रदर्शने समुन्नतिं कर्तुं जागरूक-सुसंगत-उत्प्रेरकक्रमादेशितव्यवस्थायै एका गुणवत्ता प्रणाली विकासलक्ष्येण कृता। आईक्यूएसी कुलपतेः निर्देशने कार्यं करोति तथा च गुणवत्तासंस्कृतेः अन्ताराष्ट्रियकरणेन उत्तमप्रथानां संस्थागतीकरणेन च गुणवत्तावर्धनं प्रति संस्थागतकार्याणां उपायान् प्रवर्धयितुं भविष्यत्कार्याणां परामर्शान् ददाति। आचार्यः देवीप्रसादत्रिपाठी (वास्तुशास्त्रम्) आईक्यूएसी इत्यस्य निदेशको वर्तते।

अवधिमध्ये आयोजित सभा :-

**आंतरिकगुणवत्ताश्वासनप्रकोष्ठस्य बैठक** - 04.10.2023 एवं 04.01.2024

## नियुक्तिः परामर्शप्रकोष्ठश्च

सर्वेषाम् उच्चशिक्षासंस्थानां पञ्चाङ्गे परिसरस्थापनं बहुप्रतीक्षितेषु आयोजनेषु अन्यतमम् अस्ति। नियुक्तिप्रकोष्ठः परामर्शप्रकोष्ठश्च अस्माकं छात्राणां कृते श्री.ला.बा.शा.रा.सं.वि इत्यस्य औद्योगिकप्रतिबद्धतायाः भागोऽस्ति। एसपीओ इत्यस्य केन्द्रं छात्राणां कृते साधनानां कौशलस्य समुच्चयस्य च पूरकत्वेन सहायतां प्रदातुं भवति। तथा च अन्येषां विविधानां मृदुकौशलानां समुच्चयेन सहायताप्रदानं करोति यत् तेषां कार्यं प्राप्तुं साहाय्यं करिष्यति। प्रकोष्ठस्य आवश्यकमार्गदर्शिकाः निर्माय विश्वविद्यालयस्य छात्राणां नियुक्तेः विधीनां निर्णयाः क्रियन्ते। प्रकोष्ठः आवश्यकतानुसारं कमपि विशेषज्ञसदस्यं समावेशयितुं शक्नोति। नियुक्तिप्रकोष्ठः समुचितम् अभिलेखं रक्षति। नियुक्तिप्रकोष्ठः कार्यशालाः आयोजयति, उद्योगस्य शैक्षणिकक्षेत्रस्य च विशेषज्ञानां वार्ताम् आमन्त्रयति च। एसपीओ इति कर्मचारिणां छात्राणां च दलेन चाल्यते ये नियुक्तिसम्बद्धानां क्रियाकलापानां समन्वयस्य पालनं कुर्वन्ति। प्रो. के भारतभूषणः प्रकोष्ठस्य समन्वयकः वर्तते।

## वृत्तिपरामर्शप्रकोष्ठः

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयस्य आजीविकापरामर्शप्रकोष्ठस्य स्थापना 11 पञ्चवर्षीययोजनायाः अन्तर्गतत्वेन अभवत्। आजीविकापरामर्शकोष्ठः विविध-आर्थिक-सामाजिक-भौगोलिक-पृष्ठभूमिवतां विश्वविद्यालयच्छात्राणां व्यक्तित्वलक्षणं, संचारकौशलं च वर्धयित्वा विविध-वृत्ति-सज्जतायां साहाय्यं करोति। प्रो. सुमनकुमारझाः प्रकोष्ठस्य समन्वयकः वर्तते।

## समानावसरप्रकोष्ठः

भारतं विविधतायाः देशः वर्तते, अयं विविधाः जातीय-भाषिक-क्षेत्रीय-आर्थिक-धार्मिक-वर्ग-जाति-समूहानां केन्द्रं वर्तते। वर्तमानशिक्षाव्यवस्था कर्मचारिणां छात्राणां च कृते समानरूपेण व्यवहर्तुम्, तेषां जाति-वयोः, लिङ्गस्य वा विकलाङ्गतायाः वा विचारं विना समानावकाशान् प्रदातुं, उन्मुखीकर्तुं वर्तते येन तेषां विरुद्धं भेदभावो

न स्यात् समानावसरश्च स्यात्। एतस्य लक्ष्यस्य प्राप्त्यर्थं श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयेन 2019 तमे वर्षे समानावसरप्रकोष्ठस्य (ईओसी) स्थापना कृता। अत्र कर्मचारिणां, विशेषतः छात्राणां कृते न्यायपूर्णः समानः अवसरः प्राप्तुं शक्यते। सर्वे अत्र समानव्यवहारस्य अपेक्षां कर्तुं शक्नुवन्ति तथा च अवैधभेदात्, उत्पीडनात् च मुक्ताः च भवन्ति। प्रो. नीलमठगेला प्रकोष्ठस्य समन्वयिका वर्तते।

## प्रकाशनम्

पुस्तकानां संरक्षणाय, सम्पादनाय, प्रकाशनाय च सौलभ्यं प्रदातुं शोधार्थं नामाङ्कितानां छात्राणां कृते प्रकाशन-प्रकोष्ठस्य आरम्भः कृतः वर्तते। संस्कृतभाषायाः विविधाः पुराणाः पाण्डुलिपयः प्रकोष्ठे सम्पादिताः सन्ति। प्रकोष्ठद्वारा "शोधप्रभा" इति त्रैमासिक्याः सन्दर्भित-शोध-पत्रिकायाः सम्पादनं प्रकाशनं च क्रियते, यत्र प्रसिद्धानाम् अध्येतॄणां, शिक्षकाणां शोध-सहकारिणां च शोधपत्राणि च प्रकाश्यन्ते। वार्षिकशोधकार्यशालायाः आयोजनेन सह विविधविषयेषु संगोष्ठीनाम् आयोजनमपि कृतं वर्तते। यूजीसीनियमानुसारं शोधकर्तृभ्यः संशोधनविधिप्रशिक्षणं दत्तं भवति, शास्त्राध्ययनस्य विशिष्टविधिविषये अपि ज्ञानं प्रदीयते।

**अनुसन्धानपत्रिकायाः 'शोधप्रभा'याः सम्पादनं प्रकाशनञ्च।**

शोधविभागस्य आचार्यशिवशङ्करमिश्रस्य अध्यक्षतायां परामर्शदातृसमित्या सम्पादकमण्डलेन च विधिवदनुशंसितानां शोधलेखानां शोधप्रभायां सम्पादनं प्रकाशनञ्च कृतम्। अत्र शोधसहायकेन डॉ. ज्ञानधरपाठकेन साहाय्यं विहितम्।

शास्त्राणां संस्कृतसाहित्यस्य च संरक्षणाय प्रसारणाय च योजनाया अन्तर्गतं निम्नलिखितपुस्तकानि प्रकाशितानि सन्ति-

I. शोधप्रभा (अप्रैल, 2022)
II. शोधप्रभा (जुलाई, 2022)
III. विद्यापीठपञ्चाङ्गम् (संवत्-2079)
IV. विद्यापीठपञ्चाङ्गम् (संवत्-2080)
V. वास्तुशास्त्रविमर्शः त्रयोदशं पुष्पम्

**प्रकाशनानां विक्रयणम्**

एम.ओ.ई.- इति पुनर्मुद्रण-योजनाया अन्तर्गतत्वेन विश्वविद्यालयेन शोधप्रभा, सुमंगली, भैषज्यज्योतिषम्, पञ्चाङ्गम्, वास्तुविमर्श इत्यादीनि विविधानि पुस्तकानि, पत्रिकाणि च प्रकाशितानि सन्ति। एतानि प्रकाशनानि विश्वविद्यालयेन न्यूनातिन्यूनमौल्येन अपि विक्रीयन्ते।

प्रकाशनानुभागे कार्यरतशिक्षणेतरकर्मचारीणां विवरणं तालिकायामस्ति-

| क्र.सं. | पदस्य नाम | कर्मचारिणां की संख्या |
|---|---|---|
| 1 | अनुसंधानसहायकः | 02 |
| 2 | प्रूफ रीडर | 01 |
| 3 | बहुकार्य कर्मचारी | 01 |

### अनुसूचितजाति-अनुसूचितजनजातिप्रकोष्ठः

नियुक्तौ, पदोन्नतौ, प्रवेशे, कर्मचारिनिवासेषु, छात्राणां छात्रावासे च वितरणे भारतसर्वकारस्य विश्वविद्यालयानुदायोगस्य च आरक्षणनीतेः प्रभाविकार्यान्वयनं सुनिश्चेतुं विश्वविद्यालये अस्य निरीक्षणाय अनुसूचितजाति-अनुसूचितजनजातिसदस्यानां कल्याणाय च एकः विशेषः प्रकोष्ठः स्थापितः वर्तते। प्रो. नीलमठगेला प्रकोष्ठस्य सम्पर्कपदाधिकारिरूपेण कार्यं कुर्वती अस्ति। पूर्ववर्षाणां तुलने शैक्षिक-शिक्षणेतर-कर्मचारिणां संख्यायाम् अनुसूचितजाति/अनुसूचितजनजातिसदस्यानां वृद्धिः अभवत् इति अभिलेखः महत्त्वपूर्णः वरीवर्ति। एवमेव विविधपाठ्यक्रमेषु छात्राणां नामाङ्कने च अपि महती उन्नतिः अभवत्।

प्रकोष्ठेन सम्बद्धवर्षे विविधशिक्षण-शिक्षणेतर-कार्यकर्तृणां रोस्टर-पञ्जिकायाः अन्तिमरूपं निर्धारितं वर्तते। विश्वविद्यालयप्रशासनेन निर्गतविज्ञापनानां सम्यक् परीक्षणं कृत्वा विज्ञापनार्थं बैकलागरिक्तस्थानानि अभिलेखे स्थापितानि सन्ति। अनुसूचितजाति/अनुसूचितजनजातिकर्मचारिणां विषये सांख्यिकीयप्रतिवेदनानि निर्मितानि सन्ति, तेषां दत्तांशाः शिक्षामन्त्रालयाय, भारतसर्वकाराय, यूजीसी इत्यस्मै च प्रस्तूयन्ते स्म।

विश्वविद्यालयेन विशेषनियुक्ति-अभियानं न कृतम्। यत्र समये समये रिक्तस्थानानां बैकलाँग पूरयितुं विश्वविद्यालयेन सर्वे आवश्यकाः प्रयासाः कृताः सन्ति। समीपकाले एव विश्वविद्यालयेन रिक्तशिक्षणपदानां शिक्षणेतरपदानां च विषये नूतनविज्ञापनप्रक्रिया आरब्धास्ति। समीपकाले आरक्षितपदानां कृते विज्ञापनसङ्ख्या 02/2022, 04/2022 एवं 2/2023 इत्येतयोः माध्यमेन विश्वविद्यालयेन पुनः विज्ञापनं कृतम् अस्ति।

रिक्तानां शिक्षणेतरपदानां लिखितपरीक्षामाध्यमेन पूर्त्यर्थं राष्ट्रियपरीक्षणसंस्थायै (एनटीए) इत्यस्मै सम्पर्कः विहितः, तेषाम् उत्तरम् अद्यापि प्रतीक्षते। शिक्षणेतरपदानि सह रिक्तानि शिक्षणपदानि अपि यथाशीघ्रं पूरयिष्यन्ते इति अपेक्षा अस्ति। विज्ञापनसङ्ख्या 02/2022, 04/2022, 2/2023 इत्यस्य अनुसारं पदानि न पूरितानि सन्ति चेत् विशेषनियुक्ति-अभियानम् अपि आरप्स्यते।

## शैक्षणिक-शैक्षणिकेतरपदानां विवरणम् (श्रेणीक्रमेण)

### शैक्षणिकपदानां विवरणम्

| अनुमोदितपदानां सङ्ख्या | पूरितपदानां सङ्ख्या | रिक्तपदानां सङ्ख्या |
|---|---|---|
| 139 | 109 | 30 |

| शैक्षणिकम् | पुरुषः/महिला | सामान्यः | अनु. जाति | अनु.जन जाति | अन्य वञ्चित वर्गः | दिव्याङ्ग-वर्गः | आर्थिक दुर्बल वर्गः | आहत्य |
|---|---|---|---|---|---|---|---|---|
| आचार्यः (साक्षात्) | पुरुषः | 06 | 01 | - | - | - | - | 07 |
| | महिला | - | - | - | - | - | - | - |
| आचार्यः (सी.ए.एस. अधीनम्) | पुरुषः | 29 | 02 | - | - | - | - | 31 |
| | महिला | 09 | 01 | - | - | - | - | 10 |
| सहाचार्यः (साक्षात्) | पुरुषः | 02 | - | - | - | - | - | 02 |
| | महिला | 00 | - | - | - | - | - | 00 |
| सहाचार्यः (सी.ए.एस. अधीनम्) | पुरुषः | 06 | 02 | - | - | 01 (वी.एच.) | - | 09 |
| | महिला | 01 | - | - | - | - | - | 01 |
| सहायकाचार्यः (साक्षात्) | पुरुषः | 12 | 04 | 02 | 06 | - | 03 | 27 |
| | महिला | 04 | - | - | 01 | - | - | 05 |
| सहायकाचार्यः (सी.ए.एस. 11/12 अधीनम्) | पुरुषः | 04 | 02 | 01 | 04 | - | - | 11 |
| | महिला | 05 | - | - | 01 | | | 06 |
| | **आहत्य** | **78** | **12** | **03** | **12** | **01** | **03** | **109** |

## शिक्षणेत्तरपदेषु-आरक्षणविवरणम्

| अनुमोदितपदानां सङ्ख्या | पूरितपदानां सङ्ख्या | रिक्तपदानां सङ्ख्या |
|---|---|---|
| 136 | 110 | 26 |

## शिक्षणेत्तरपदेषु आरक्षणविवरणम्

| शिक्षणेतरम् | पुरुषः/महिला | सामान्यः | अनु. जाति | अनु.जन जाति | अन्य वञ्चितवर्गः | दिव्याङ्ग-वर्गः | अल्प-सङ्ख्यकः | आहत्य |
|---|---|---|---|---|---|---|---|---|
| 'अ' वर्गः | पुरुषः | 06 | 02 | - | 02 | - | - | 10 |
| | महिला | 02 | 01 | - | - | - | - | 03 |
| 'बी' वर्गः | पुरुषः | 08 | 03 | 01 | 05 | 01 OH | - | 18 |
| | महिला | 06 | 03 | - | 01 | - | - | 10 |
| 'स' वर्गः | पुरुषः | 33 | 10 | 02 | 15 | 01 HH | - | 61 |
| | महिला | 06 | - | - | 02 | - | - | 08 |
| **योगः** | | **61** | **19** | **03** | **25** | **02** | - | **110** |

## विश्वविद्यालये अनुसूचित-अनुसूचितजनजाति-अन्यवञ्चितवर्गस्य कृते विकलाङ्गानां रिक्तपदानां विवरणम् (31.03.2021 पर्यन्तम्)

### शैक्षणिकम्

| क्र.सं. | पदनाम | बैकलॉग-अनुसूचितजाति-शैक्षणिकपदानां संख्या | | | बैकलॉग-अनुसूचितजनजाति-शैक्षणिकपदानां संख्या | | | बैकलॉग-अन्यवञ्चित-शैक्षणिकपदानां संख्या | | |
|---|---|---|---|---|---|---|---|---|---|---|
| | | अभिज्ञातम् | पूरितम् | अपूरितम् | अभिज्ञातम् | पूरितम् | अपूरितम् | अभिज्ञातम् | पूरितम् | अपूरितम् |
| 1. | आचार्यः | 0 | 0 | 0 | 01 | 0 | 01 | 0 | 0 | 0 |
| 2. | सहाचार्यः | 03 | 0 | 03 | 01 | 0 | 01 | 05 | 0 | 05 |
| 3. | सहायकाचार्यः | 08 | 4 | 04 | 03 | 01 | 02 | 04 | 0 | 03 |
| | **योगः** | **11** | **4** | **07** | **05** | **01** | **04** | **09** | **0** | **08** |

### शिक्षणेत्तरम्

| क्र.सं. | पदनाम | बैकलॉग-अनुसूचितजाति-शिक्षणेत्तरपदानां संख्या | | | बैकलॉग-अनुसूचितजनजाति-शिक्षणेत्तरपदानां संख्या | | | बैकलॉग-अन्यवञ्चित-शिक्षणेत्तरपदानां संख्या | | |
|---|---|---|---|---|---|---|---|---|---|---|
| | | अभिज्ञातम् | पूरितम् | अपूरितम् | अभिज्ञातम् | पूरितम् | अपूरितम् | अभिज्ञातम् | पूरितम् | अपूरितम् |
| 1. | 'अ' वर्गः | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 |
| 2. | 'ब' वर्गः | 0 | 0 | 0 | 01 | 0 | 01 | 0 | 0 | 0 |
| 3. | 'स' वर्गः (पूर्ववर्ती 'द' ग्रुपडी-कैडरसहितम् | 0 | 0 | 0 | 0 | 0 | 0 | 02 | 0 | 02 |
| | **योगः** | **0** | **0** | **0** | **01** | **0** | **01** | **02** | **0** | **02** |

विश्वविद्यालयेन यथासमये विकलाङ्गपदानि पूरयितुं सर्वविधाः आवश्यकाः प्रयासाः कृताः वर्तन्ते। कंचित्कालं पूर्वमेव विश्वविद्यालयेन रिक्तशैक्षणिक-शिक्षणेतरपदसम्बद्धी विज्ञापनप्रक्रिया नूतनतया आरब्धा वर्तते। सद्यः एव, आरक्षितपदानां कृते विश्वविद्यालयद्वारा विज्ञापनसंख्या 01/2021 माध्यमेन विज्ञापितं तथा आवेदनस्य अन्तिमा तिथिः 27.7.2021 आसीत्। शिक्षणेतरपदानां पूर्त्यर्थं लिखितपरीक्षायाः आयोजनार्थम् इत्यस्य कृते 'राष्ट्रियपरीक्षणएजेंसी' आवेदिता अस्ति एवं च सम्प्रति तेषाम् उत्तरस्य प्रतीक्षा अस्ति। शैक्षणिक एवं तदितररिक्तपदानां यथा शीघ्रं पूर्तिः भविष्यति इति आशासे। यदि विज्ञापनसंख्या 02/2022, 04/2022 तथा च 02/2023 इत्यनुसारं नियुक्तयः न कृताः तर्हि विशेषनियुक्त्यभियानस्यारम्भः भविष्यति।

# राष्ट्रीयच्छात्रसेना ( एन.सी.सी. )

## क. राष्ट्रीयच्छात्रसेना ( एन.सी.सी. )

एन.सी.सी छात्राः स्थापनादिवस-व्याख्यानमाला-रक्तदानशिवरादि-विविधविश्वविद्यालयीयगतिविधिषु भागं गृहीतवन्तः। एन.सी.सी छात्राः एन.सी.सी निदेशालयस्य स्वच्छभारताभियानं, एकतादिवसः, गणतन्त्रदिवसः, पूर्वशिविरम्, गणतन्त्रदिवसशिविरम्, मुख्यमन्त्रिशोभायात्राः, प्रधानमन्त्रिशोभायात्राः, युवाकार्यक्रमः अपि च चेत्यादिषु अन्यगतिविधिषु अपि भागं गृहीतवन्तः। विश्वविद्यालये एन्.सी.सी गतिविधीनां प्रभाविपर्यवेक्षणाय समन्वयार्थञ्च **डॉ. मीनाक्षीमिश्रः महिलावर्गस्य अधिकारिणी ( लेफ्टिनेंट ), डॉ. अभिषेकतिवारी, एन्.सी. सी बाँयजविंग इत्यस्य अधिकारिरूपेण च नियुक्तौ स्तः।**

## ख. अवधौ राष्ट्रीयच्छात्रसेनायाः छात्राणां प्रतिभागिता

- जेयूओ अभिषेकचन्द्रझा जूनमासस्य 17 दिनाङ्कात् जूनमासस्य 26 दिनाङ्कं 2023 यावत् नेहरुपर्वतारोहणसंस्थानं इत्यनेन उत्तरकाश्यां एडवेंचर कोर्स कैंप इत्यस्मिन् भागग्रहणाम्।
- २ एसयूओ वरुणः कैडेट सौरभडोडियालः च प्रथम द्वि देहलीनौसेना एककामाध्यमेन आयोजितजूनमासस्य 26 दिनाङ्कात् जुलाईमासस्य 03 दिनाङ्कं यावत् 2023 पर्यन्तं स्कूबा डाइविंग कैंप इत्यस्मिन् प्रतिभागं कृतवान्।
- २ 07 सीटीएस इत्यनेन 7 देहली बटालियन इतिद्वारा जुलाईमासस्य 15 दिनाङ्कात् जुलाईमासस्य 24 दिनाङ्कं यावत् 2023 पर्यन्तं सफदरजंग एन्क्लेव इत्यत्र नवदेहल्याम् आयोजितसीएटीसीकैम्प इत्यत्र प्रतिभागः कृतः।
- २ जेयूओ शिवमतिवारी कैडेड अभिषेकपोखरियालश्च अगस्यमासस्य 1 दिनाङ्कात् 15 दिनाङ्कं यावत् 2023 पर्यन्तं छत्रसालस्टेडियम इत्यत्र नवदेहली मुख्यमन्त्रिकार्यक्रमे प्रतिभागं कृतवन्तः।
- २ एसयूओ वरुणः श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयस्य माननीयकुलपतिं प्रति विशेषगार्ड ऑफ ऑनर इति प्राददात्। यत्र माननीयकुलपतिना स्वतन्त्रतादिवसमवलक्ष्य 2023 तमे वर्षे चयनित सीटीएस इत्येतेभ्यः रैंक इति प्रदत्तम्।
- २ 15 छात्रसेनाः (कैडेट्स) इत्यनेन डॉ. अभिषेकतिवारी इत्यस्य मार्गदर्शने सितम्बरमासस्य 05 दिनाङ्के 2023 तमे वर्षे कुतुबमीनार इत्यत्र 420 प्रेसीडेंटसमूहचर्चायाः जागरूकतायाः च आयोजने प्रतिभागः कृतः।
- २ एमसीसी कैडेट्स इत्यनेन श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयस्य परिसरे कटवारियासराये अक्टूबरमासस्य 02 दिनाङ्के 2023 तमे वर्षे स्वच्छताभियानमायोजितम्।
- २ 08 कैडेट्स इत्येतैः अक्टूबरमासस्य 20 दिनाङ्कात् 27 दिनाङ्कं यावत् 2023 तमे वर्षे श्रावस्ती-उत्तरप्रदेशे अखिलभारतीय-उत्तरप्रदेशट्रैकिंग (भारत-नेपाल-अभियान) शिविरे प्रशिक्षणं प्राप्तम्, यत्र एसयूओ वरुणः दिल्लीनिदेशालयस्य वरिष्ठः आसीत्। अस्मिन् शिविरे अस्माकं कैडेट्स इत्यादीनां प्रदर्शनं निम्नानुसारम् आसीत्-

(I) जेयूओ शिवमतिवारी भाषणे निबन्धलेखनप्रतियोगितायां च तृतीयस्थानं प्राप्नोत्।

(ii) सीएचएम निकुंजत्रिपाठी कैडेट् सौरभडोंडियालश्च समूहगायनप्रतियोगितायां प्रथमं स्थानं प्राप्नुताम्।

(iii) अन्तरनिदेशालयवालीबॉलप्रतियोगितायां देहलीदलं प्रथमं स्थानं प्राप्नोत्।

- एसयूओ वरुणः नवम्बरमासस्य 19 दिनाङ्कात् 30 दिनाङ्कं यावत् 2023 तमे वर्षे आगरा, उत्तरप्रदेशे एडवांस लीडरशिपकैम्पमध्ये प्रतिभागं कृतवान्।
- एसयूओ वरुणः विश्वविद्यालयस्य कैडेट्स इत्येतैः साकं माननीय शिक्षामंत्रिणा कौशलविकास-उद्यमिता मंत्रिणा च श्री धर्मेन्द्रप्रधानेन साकं माननीयकुलपतिमहोदयस्य च दीक्षान्तसमारोहे दिसम्बरमासस्य 05 दिनाङ्के 2023 तमे वर्षे विशेष-गार्ड ऑफ ऑनर प्राददात्।
- 03 कैडेट्स दिसम्बरमासस्य 01 दिनाङ्कतः 12 दिनाङ्कं यावत् 2023 तमस्य वर्षस्य 19 बिहार रेजिमेंटद्वारा नवदेहल्यामायोजित-आर्मी-अटैचमेंट-कैंप इत्यस्मिन् प्रतिभागं कृतवन्तः।
- विश्वविद्यालयस्य कैडेट्स जनवरीमासस्य 26 दिनाङ्के 2024 तमे वर्षे श्रीलालबहादुरशास्त्रीराष्ट्रिय-संस्कृतविश्वविद्यालयस्य नवदेहल्याः माननीयकुलपतिमहोदयस्य गार्ड ऑफ ऑनर इति प्रदत्तवन्तः, यत्र कैडेट्स विभिन्नक्षेत्रेषु उत्कृष्टप्रदर्शनाय पुरस्कारमपि आलभन्त।
- 16 कैडेट्स क्रमशः 16 फरवरीमासस्य 16 दिनाङ्के तथा च मार्चमासस्य 03 दिनाङ्के 2023 तमे वर्षे 'सी' प्रमाणपत्रप्रायोगिकलिखितपरीक्षासु च उपस्थिताः अभवन्।

# राष्ट्रीयसेवायोजना (एन.एस.एस.)

## क. राष्ट्रियसेवायोजनायाः विषये

विश्वविद्यालयस्य राष्ट्रियसेवायोजना एतादृशकार्यक्रमाणाम् आयोजनं करोति येषु एतस्याः स्वयंसेवकाः भागं गृह्णन्ति तथा च तत्कालसमुदायं सेवन्ते। अत्र रक्तदानशिबिरैः सह अनेके अभिमुखीकरण-जागरूकता-कार्यक्रमाः अपि आयोजिताः सन्ति। अनया आपदासु निवारणकार्याणि अपि क्रियन्ते, विशेषशिबिराणाम् आयोजनं च क्रियते। विश्वविद्यालये एन् एस्एस्-क्रियाकलापानाम् प्रभाविपर्यवेक्षणाय समन्वयाय च **डॉ. सौरभ-दुबे एन्एस्एस्-अन्वितौ एसोसिएट् एनएसएस-कार्यक्रम-अधिकारी अस्ति।**

## ख. अवधौ राष्ट्रियसेवायोजनायाः स्वयंसेवकानां सहभागिता

- जूनमासस्य 05 दिनाङ्के 2023 तमे वर्षे एनएसएस इकाईद्वारा श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृत-विश्वविद्यालये नवदेहल्यां विश्वपर्यावरणदिवसमालक्ष्य अवसरेऽस्मिन् वृक्षारोपणे 30 एनएसएस-स्वयंसेवकाः भागं कृतवन्तः।
- अगस्तमासस्य 22 दिनाङ्कातः 24 दिनाङ्कं यावत् 2023 तमे वर्षे एनएसएस इकाई श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालय नवदेहलीद्वारा आयोजितेऽस्मिन् मेरी माटी मेरा देश इति कार्यक्रमे 70 एनएसएसस्वयंसेवकाः प्रतिभागं कृतवन्तः।

- अगस्तमासस्य 23 दिनाङ्के 2023 तमे वर्षे एनएसएस इकाई श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृत-विश्वविद्यालय नवदेहलीद्वारा आयोजिततिरङ्गायात्रा कार्यक्रमेऽस्मिन् 75 एनएसएसस्वयंसेवकाः भागं कृतवन्तः।
- अगस्तमासस्य 30 दिनाङ्के 2023 तमे वर्षे एनएसएस इकाई श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृत-विश्वविद्यालय नवदेहलीद्वारा आयोजितस्वच्छतापखवाडा कार्यक्रमे 40 एनएसएसस्वयंसेवकाः प्रतिभागं कृतवन्तः।
- अगस्तमासस्य 24 दिनाङ्के अक्टूबरमासस्य 01 दिनाङ्के च 2023 तमे वर्षे एनएसएस इकाई श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालय नवदेहलीद्वारा श्रमदानकार्यक्रमे 45 एनएसएसस्वयं-सेवकाः प्रतिभागं कृतवन्तः।
- अक्टूबरमासस्य 12 दिनाङ्के 2023 तमे वर्षे एनएसएस इकाई श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृत-विश्वविद्यालय नवदेहलीद्वारा आयोजित-अमृतकलशयात्रा (मेरी माटी मेरा देश) इति कार्यक्रमेऽस्मिन् शताधिकाः स्वयंसेवकाः भागं कृतवन्तः।
- नवम्बरमासस्य 26 दिनाङ्के 2023 तमे वर्षे एनएसएस इकाई श्रीलालबहादुरशास्त्रीराष्ट्रिय-संस्कृतविश्वविद्यालय नवदेहलीद्वारा 'संविधानदिवसे' कार्यक्रमेऽस्मिन् पञ्चशदधिकाः स्वयंसेवकाः प्रतिभागं कृतवन्तः।
- दिसम्बरमासस्य 10 दिनाङ्के 2023 तमे वर्षे एनएसएस इकाई श्रीलालबहादुरशास्त्रीराष्ट्रिय-संस्कृतविश्वविद्यालय नवदेहलीद्वारा आयोजितेऽस्मिन् 'अन्ताराष्ट्रियमानवाधिकारदिवसः' कार्यक्रमे 25 एनएसएसस्वयंसेवकाः भागं कृतवन्तः।
- मार्चमासस्य 06 दिनाङ्के 2023 तमे वर्षे एनएसएस इकाई श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृत-विश्वविद्यालय नवदेहलीद्वारा आयोजिते 'मेरा पहला वोट देश के लिए' इति कार्यक्रमेऽस्मिन् 40 एनएसएसस्वयंसेवकाः भागं कृतवन्तः।

# प्राशासनिकविभाग-विश्वविद्यालयनिर्माणविभाग-RTI विभागाधिकारिणाञ्च वर्णनम्

**प्राशासनिकविभाग-विश्वविद्यालय-निर्माणविभाग-RTI विभागाधिकारिणाञ्च वर्णनम्**

- लेखः
- शैक्षणिकम्
- प्रशासनम्
- विकासः
- परीक्षा
- विश्वविद्यालय-कार्यानुभागः
- सूचनायाः अधिकारः अधिनियमः, 2005 इत्यस्य अन्तर्गतः विवरणम्

# अनुभागाः विश्वविद्यालय कार्यनुभागः च

## लेखः

लेखविभागः वित्तपदाधिकारिणः अधीनं कार्यं करोति। अस्मिन् उपकुलसचिवः, सहायककुलसचिवः, अनुभागाधिकारी, सहायकः, वरिष्ठलिपिकः/कोषाध्यक्षः, कनिष्ठलिपिकः च कार्यरताः सन्ति। विश्वविद्यालयः विश्वविद्यालयानुदानायोगाद् अनुदानं प्राप्नोति। विश्वविद्यालयस्य दैनन्दिनकार्य्ये लेखविभागस्य महती भूमिका अस्ति। श्रीलालबहादुरशास्त्रीराष्ट्रीयसंस्कृतविश्वविद्यालयाय अनुदानं विश्वविद्यालयानुदानायोगेन सामान्यतया (1) वेतनम्, (2) आवर्ती (3) मूलधनम् चेति त्रयाणां शीर्षकाणाम् अन्तर्गतं स्वीकृतं भवति। लेखाविभागस्य कार्याणि अधिककुशलरूपेण प्रबन्धयितुं काश्चन समितयः निर्मिताः सन्ति। अत्र द्वे महत्त्वपूर्णे समित्यौ स्तः- 1. वित्तसमितिः 2. निवेशसमितिश्च। विश्वविद्यालयस्य लेखविभागः अतीव प्रगतिशीलः पूर्णतया सङ्गणकीकृतः च अस्ति।

यत्र एतद्द्वयं महत्त्वपूर्णम् अस्ति।

1. वित्तसमितिः
2. निवेशसमितिः

विश्वविद्यालयस्य लेखाविभागः प्रगतिशीलः सङ्गणकाधारितः च अस्ति।

**लेखानुभागे कार्यरतशिक्षणेतरकर्मचारिणां विवरणं तालिकायामस्ति :-**

| क्र.सं. | पदस्य नाम | कर्मचारिणां संख्या |
|---|---|---|
| 1. | वित्ताधिकारी | 01 |
| 2. | उपकुलसचिवः | 01 |
| 3. | सहायकः कुलसचिवः | 01 |
| 4. | अनुभागाधिकारी | 01 |
| 5. | सहायकः | 03 |
| 6. | वरिष्ठलिपिकः | 01 |
| 7. | कनिष्ठलिपिकः | 02 |
| 8. | बहुकार्यकर्मचारी | 01 |
| | **योगः** | **11** |

## शैक्षणिकम्

विश्वविद्यालयस्य शैक्षणिकविभागस्य उद्देश्यं शैक्षणिकक्रियाकलापानां सौविध्यकरणं भवति। विश्वविद्यालयस्य विविधपाठ्यक्रमेषु, कार्यक्रमेषु, अन्येषु च सम्बद्धेषु विषयेषु छात्राणां नामाङ्कनस्य सौविध्यं चास्ति। अयं विभागः अध्ययनस्य अनेकक्षेत्रेषु छात्रपरामर्शदानेन संकायस्य सहायतां कर्तुं समर्थः अस्ति। शैक्षणिकविभागः विभिन्नेषु पाठ्यक्रमेषु, कक्षासु, विषयेषु च छात्रनामाङ्कनस्य सूचनां, विवरणं प्रदातुं तथा च विश्वविद्यालयस्य शैक्षणिकक्रियाकलापयोः भागं गृहतां छात्राणां कृते परामर्शं प्रदातुम् उत्तरदायी अस्ति। अयम् अनुभागः छात्राणां उपस्थितेः निरीक्षणम्, तस्याः विस्तृतसूचेः संरक्षणं च करोति।

**शैक्षणिकानुभागे कार्यरतशिक्षणेतरकर्मचारिणां विवरणं तालिकायामस्ति –**

| क्र.सं. | पदस्य नाम | कर्मचारिणां संख्या |
|---|---|---|
| 1. | सहायकः कुलसचिवः | 01 |
| 2. | अनुभाग-अधिकारी | 01 |
| 3. | सहायकः | 01 |
| 4. | वरिष्ठलिपिकः | 02 |
| 5. | बहुकार्यकर्मचारी | 02 |
| | **योगः** | **07** |

## राष्ट्रीयपरीक्षणसंस्थायाः ( NTA ) माध्यमेन प्रवेशः

स्नातक-स्नातकोत्तरकार्यक्रमेषु प्रवेशार्थं राष्ट्रिय-परीक्षण-संस्थया (NTA) प्रवेशपरीक्षायाः संचालनं कृतम्।

# प्रशासनम्

प्रशासनिककार्यस्य सुचारुरूपेण कार्यं सुनिश्चित्य खण्डत्रयेषु विश्वविद्यालयप्रशासनस्य वर्गीकरणं कृतम्। प्रत्येकखण्डस्य संक्षिप्तवर्णनं अधः प्रदत्तम्-

## प्रशासनम् I ( शैक्षणिकम् )

प्रशासनं (I) (शैक्षणिकम्) विश्वविद्यालयस्य महत्त्वपूर्णः अपविभागः अस्ति, यः कुलसचिवस्य निर्देशने स्वकर्तव्यं निर्वहति। अयम् उपभागः मुख्यतया विश्वविद्यालयानुदानायोगस्य केन्द्रीयसंस्कृतविश्वविद्यालयः- 2020 इत्यस्य च नियमविनियमानाम् अनुपालनेन विश्वविद्यालयशिक्षकप्रशिक्षकाणां नियुक्तिसम्बद्धानां कार्याणाम् उत्तरदायित्वं निर्वहति।

**प्रशासनानुभागे-I कार्यरतशिक्षणेतरकर्मचारिणां विवरणं तालिकायामस्ति -**

| क्र.सं. | पदस्य नाम | कर्मचारिणां संख्या |
|---|---|---|
| 1. | सहायकः कुलसचिवः | 01 |
| 2. | अनुभागाधिकारी | 01 |
| 3. | सहायकः | 01 |
| 4. | वरिष्ठलिपिकः | 01 |
| 5. | कनिष्ठलिपिकः | 01 |
| 6. | बहुकार्यकर्मचारी | 01 |
| | **योगः** | **06** |

### शिक्षणेतरकर्मचारिणां कृते अनुभागेन निम्नलिखितकार्यशालाः आयोजिताः

| क्र.सं. | दिनांक | विषयः | प्रतिभागिनः |
|---|---|---|---|
| 1. | 14.09.2023 | हिन्दी भाषा की विकास यात्रा में विज्ञापन की भूमिका | 48 |
| 2. | 03.10.2023 | प्रशानिक कार्यों में हिन्दी का प्रयोग सुगम एवं सरल है | 25 |
| 3. | 20.12.2023 | कार्यालय कामकाम में हिन्दी की बढ़ती प्रगति | 29 |

## प्रशासनम्-II (शैक्षणिकेतरम्)

प्रशासनानुभागः - II विश्वविद्यालयस्य महत्त्वपूर्णः भागः अस्ति, यः कुलसचिवं कुलपतिं च प्रति प्रतिवेदनं प्रददाति। अयम् अनुभागः विश्वविद्यालये निवृत्तिवेतनधारकसहितानां शिक्षणेतरकर्मचारिसेवासम्बद्धानां सर्वेषां विषये निर्वहति। संस्कृतविश्वविद्यालयस्य 2020 तमवर्षस्य अधिनियमानुसारं विश्वविद्यालयस्य नियमानुसारं यूजीसी एवं भारतसर्वकारस्य नियमान् नीतिः च तदा तदा प्रकाशयति गृह्णाति च। सम्प्रति विश्वविद्यालये 136 शिक्षणेतरपदानि स्वीकृतानि सन्ति, तेषु 111 कर्मचारिणः कार्यरताः सन्ति।

**प्रशासनानुभागे- II कार्यरतशिक्षणेतरकर्मचारिणां विवरणं तालिकायामस्ति-**

| क्र.सं. | पदस्य नाम | कर्मचारिणां संख्या |
|---|---|---|
| 1. | सहायककुलसचिवः | 01 |
| 2. | अनुभागाधिकारी | 01 |
| 3. | वरिष्ठलिपिकः | 01 |
| 4. | कनिष्ठलिपिकः | 01 |
| | **योगः** | **04** |

## सामान्यप्रशासनम्

सामान्यप्रशासनानुभागः स्वकर्तव्यानामाधारेण सम्पूर्णविश्वविद्यालयाय प्रशासनिकं तार्किकञ्च साहाय्यं प्रददाति। अनुभागः कुलसचिवस्य पर्यवेक्षणे मार्गदर्शने च कार्यं करोति। अयं सर्वेषां शैक्षणिक-शैक्षणिकेतर-कर्मचारिणां दैनन्दिन-आवश्यकताः पूरयति, एवञ्च तेभ्यः तदनुसारं सम्बद्धकार्यालयानां सुचारुकार्याणां सौविध्यं प्रददाति।

अयमनुभागः सामान्यप्रशासनसुरक्षासेवाः, भण्डारस्य क्रयणं, भारतसर्वकारस्य विभिन्नसामुदायिक-मुख्यकार्यक्रमाणां कार्यान्वयनं करोति। एवञ्च उत्सव-वैधानिकविषय-आवासविनियोग-चिकित्साप्रतिपूर्त्यादिषु विषयेषु विविधसर्वकारीयनिजसंस्थानां समन्वये अपि महत्त्वपूर्णां भूमिकां निर्वहति। सामान्यप्रशासनानुभागस्य नेतृत्वं सहायक-कुलसचिवः (जीएडी) करोति यः अनुभागाय वितरितानां कर्तव्यानां दायित्वानाञ्च निरीक्षणं करोति। सामान्यप्रशासनानुभागः विश्वविद्यालयस्य सर्वेषां शैक्षणिक-शैक्षणिकेतर-समुदायानां कृते समग्रसेवा-सौविध्यसमन्वयान्वितिरूपेण कार्यं करोति।

**प्रशासनानुभागे-III कार्यरतशिक्षणेतरकर्मचारिणां विवरणं तालिकायामस्ति-**

| क्र.सं. | पदस्य नाम | कर्मचारिणां संख्या |
|---|---|---|
| 1. | सहायकः कुलसचिवः | 01 |
| 2. | अनुभागाधिकारी | 01 |
| 3. | वरिष्ठलिपिकः | 01 |
| 4. | बहुकार्यकर्मचारी | 01 |
| | **योगः** | **05** |

## विकासानुभागः

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयस्य विकासानुभागस्य स्थापना विश्वविद्यालयस्य सर्वेषां प्रस्तावानां, कार्यक्रमाणाम्, उपक्रमाणां च आयोजनस्योद्देश्येन कृता। विकासानुभागाय समग्रविकासस्य विश्वविद्यालयवार्षिकरणनीतिसञ्चालनयोजनानां प्रभाविकार्यनीतीनां परिचालनयोजनानाञ्च, प्रभाविकार्यान्वयनस्य कार्यं प्रदत्तम्। येन विश्वविद्यालयस्य दीर्घकालीना दृष्टिः परिभाषिता भवेत्। अयमनुभागः विविधनिर्णयस्वीकरण-प्रक्रियायां साहाय्यं करोति येन शैक्षणिकक्षेत्रैः सहैव प्रशासनिकक्षेत्रेष्वपि उपलब्धयः प्राप्येरन् तद्दृढाश्च भवेयुः। अस्मै अनुभागाय आन्तरिकगुणवत्ताऽऽश्वासनप्रकोष्ठस्य (आईक्यूएसी) सचिवालयनिबन्धनस्य, विश्व-विद्यालयानुदानायोग-विशेषसहायताकार्यक्रमस्य (एसएपी) क्रियान्वितीकरणनिरीक्षणयोः, विविधस्ववित्त-पाठ्यक्रमेषु धनप्रबन्धनस्य, विश्वविद्यालयेषु संगोष्ठीनां/सम्मेलनानाम् आयोजनस्य अन्येषां प्रमुखाणां कार्यक्रमाणां वार्षिकप्रतिवेदनसज्जीकरणस्य च विविधदायित्वानि प्रदत्तानि। विकासानुभागः कर्मचारिभ्यः छात्रेभ्यश्च

चिकित्सासौविध्यानां, भोजनशालासौविध्यानां, राष्ट्रियसेवायोजनायाः (एनएसएस), विश्वविद्यालयस्य अन्यासां संस्थानाम् (ऐजेंसी) संस्थानानां विश्वविद्यालयस्य भूमिगतस्थानस्य, संगोष्ठीभवनानां, व्याख्यानप्रकोष्ठानाञ्च वितरणस्य, स्वास्थ्यरक्षणान्वितेः-कार्याणामपि संरक्षणं करोति। विकासानुभागः कुलसचिवस्य पर्यवेक्षणे मार्गदर्शने च कार्यं करोति। विकासानुभागस्य नेतृत्वम् उपकुलसचिवः (लेखः विकासश्च) करोति, यः अनुभागाय वितरितानां कर्त्तव्यानां दायित्वानाञ्च निरीक्षणं करोति।

## विकासानुभागे कार्यरतशिक्षणेतरकर्मचारिणां विवरणं तालिकायामस्ति-

| क्र.सं. | पदस्य नाम | कर्मचारिणां संख्या |
|---|---|---|
| 1. | उपकुलसचिवः | 01 |
| 2. | सहायककुलसचिवः | 01 |
| 3. | निजीसचिवः | 01 |
| | **योगः** | **03** |

## परीक्षानुभागः

परीक्षाविभागेन षाण्मासिकप्रणाल्याः माध्यमेन नियमितकक्षाणाम् अंशकालिकपाठ्यक्रमाणाञ्च वर्षे द्विवारं परीक्षाः आयोज्यन्ते। छात्राणाम् आवेदनपत्रपूरणादारभ्य परीक्षापरिणामस्य घोषणां यावत्, सर्वाणि कार्याणि क्रियन्ते, अंकपत्रवितरणम्, अस्थायिप्रमाणपत्रवितरणं, दीक्षान्तसमारोहे उपाधिवितरणं चेत्यादीनां कार्याणाम् उत्तरदायित्वम् अस्ति।

**परीक्षानुभागे कार्यरतशिक्षणेतरकर्मचारिणां विवरणं तालिकायामस्ति-**

| क्र.सं. | पदस्य नाम | कर्मचारिणां संख्या |
|---|---|---|
| 1. | परीक्षानियन्त्रकः | 01 |
| 2. | उपकुलसचिवः | 01 |
| 3. | अनुभागाधिकारी | 01 |
| 4. | सहायकः | 01 |
| 5. | वरिष्ठलिपिकः | 01 |
| 6. | कनिष्ठलिपिकः | 02 |
| 7. | बहुकार्यकर्मचारी | 04 |
| | **योगः** | **11** |

# विश्वविद्यालयकार्यानुभागः ( यू.डब्ल्यू.डी. )

## भूमिः भवनं च

विश्वविद्यालयनिर्माणविभागेन विश्वविद्यालयपरिसरस्य अधोलिखितभूमेः भवनस्य च रक्षणं क्रियते।

विश्वविद्यालयपरिसरः दक्षिण्यां देहल्यां शहीदजीतसिंहमार्गे कुतुबसांस्थानिकक्षेत्रे 10.65 एकड्क्षेत्रे लघुभूखण्डे स्थितोऽस्ति। अयं विश्वविद्यालयपरिसरः भारतीयप्रौद्योगिकिसंस्थानं, राष्ट्रियशैक्षिकानुसन्धान-प्रशिक्षणपरिषद्, राष्ट्रियशैक्षिक-योजनाप्रशासनविश्वविद्यालयः, भारतीयविदेशव्यापारसंस्थानं, आईएमआई, जवाहरलालनेहरूविश्वविद्यालयः, आईएसआई, केन्द्रीयविद्यालयसंघटनम् चेत्यादीनाम् अन्येषां राष्ट्रियान्ता-राष्ट्रियशैक्षणिकसंस्थानानां पार्श्वे प्रमुखभूमौ स्थितोऽस्ति।

अयं परिसरः सौविध्यजनकस्थाने स्थितोऽस्ति। सम्यग्रीत्या युक्तोऽस्ति। सम्यग्रूपेण प्रबन्धितोऽस्ति। एवञ्च अस्य संरक्षणं सम्यक् रूपेण कृतोऽस्ति। अष्टावासीयभवनेषु एकः विश्रामालयः, एकः छात्राणां छात्रावासः विद्यते, यस्मिन् चत्वारि शैक्षणिकभवनानि च सन्ति। सर्वाणि भवनानि राजमार्गेण सह सम्यक्तया संयुक्तानि सन्ति। परिसरे अनेकानि लघूनि उद्यानानि यथा विश्रान्तिवाटिका स्वर्णजयन्ती-उद्यानञ्च विद्यन्ते। उपयुक्तबाह्यप्रकाशव्यवस्थां सुनिश्चेतुं परिसरे उच्चद्रव्यमानप्रकाशप्रणालीनामुपयोगः क्रियते। परिसरे एका वेधशाला विद्यमाना अस्ति यत्र अनेकानि यन्त्राणि निर्मितानि सन्ति, अत्र अहोरात्रं समेषां राशीनां विषये समयेन विश्वविद्यालयीयाचार्यैः शोधः कार्यते। अन्येभ्यः परिसरेभ्यः अपि अनेकवारम् इमां वेधशालां द्रष्टुं जनाः आगच्छन्ति।

## विश्वविद्यालये चत्वारि शैक्षणिकभवनानि -

1. **शैक्षिकसदनम्** - इदमत्यन्तं पुरातनं द्वितलयुक्तं भवनमस्ति। शैक्षणिकानुसन्धानविभागः पुस्तकालय-विभागश्च अस्मिन्नेव स्थितोऽस्ति। अस्मिन्नेव भवने दर्शनशास्त्रसङ्कायस्य साहित्यसंस्कृतिसङ्कायस्य च विभागाः सन्ति।

2. **सारस्वतसाधनासदनम्** - इदं पञ्चतलयुक्तं भवनमस्ति। अस्मिन् भवने एका उन्नयनी (Lift) अस्ति। अत्रैव कुलपतिसचिवालयः, सङ्गणकप्रयोगशालासहितानि सङ्गणककेन्द्राणि, सङ्गोष्ठीप्रकोष्ठाः (वाचस्पतिसभागारः) समितिप्रकोष्ठाः च स्थिताः सन्ति।

3. **बृहस्पतिभवनम्** - इदं द्वितलयुक्तं भवनं विद्यते। अस्मिन् वेदपौरोहित्यविभागाः सन्ति। अस्मिन्नेव परिसरे एका कर्मकाण्डप्रयोगशालाऽपि अस्ति। छात्रान् अधिगमाय इष्ट-योगप्रयोगशाला निर्मिता अस्ति।

4. **स्वर्णजयन्तीसदनम्** - इदं पञ्चतलयुक्तं भवनमस्ति। अस्मिन् भवने तिस्रः उन्नयन्यः (Lifts), चत्वारि सोपानानि च सन्ति। अस्य भवनस्य निर्माणम् उपनियमानामनुसारेण कृतम्। अस्मिन् भवने प्रशासनविभागाः यथा प्रशासनं, वित्तं, शैक्षणिक-विकासः, सांख्यिकीयप्रकोष्ठः, केन्द्रियभण्डारः चेत्यादयः सन्ति। कुलसचिवस्य, वित्ताधिकारिणः कुलानुशासकानाञ्च कार्यालयाः अपि अत्रैव सन्ति। सहैव ज्योतिष-वास्तुशास्त्र-व्याकरण-धर्मशास्त्र-शैक्षणिकविभागाः, शिक्षाशास्त्रविभागः, समिति-प्रकोष्ठः, शिक्षणाधिगमकेन्द्रमित्यादयः अपि अस्मिन्नेव भवने विद्यन्ते।

इतोऽपि विश्वविद्यालयकार्यविभागेन विश्वविद्यालयपरिसरे अधोलिखितानां संरचनानां विकाससम्बद्धानि नूतनानि कार्याणि कृतानि। यथा-

वास्तुशिल्पयोजनानामनुमोदनाधारेण सीपीडब्ल्यूडी इत्यनेन निम्नलिखितानां तिसृणां भवनपरियोजनानां कृते संशोधितानुमानितप्रस्तावाः प्रस्तुताः-

1. बालकच्छात्रावासनिर्माणाय- रु. 56,88,12,600/-
2. बालिकाछात्रावासनिर्माणाय- रु. 35,40,52,200/-
3. शिक्षासदननिर्माणाय- रु. 162,33,10,000/-
4. सञ्चालनसंरक्षणभ्याम् - रु. 25,32,29, 661/-

विश्वविद्यालयस्य प्रबन्धनसमित्या (बीओएम) एतेषामनुमानानां कृते स्वीयानुमतिः प्रदत्ताऽस्ति। प्रस्तावः शिक्षामन्त्रालयाय प्रेषितः।

**अधोलिखितशिक्षणेतरकर्मचारिणः विश्वविद्यालयनिर्माणविभागे कार्यरताः सन्ति-**

| क्र.सं. | पदस्य नाम | कर्मचारिणां संख्या |
|---|---|---|
| 1. | कार्यकारिणी-अभियन्ता | 01 |
| 2. | सहायकाभियन्ता | 01 |
| 3. | कनिष्ठाभियन्ता | 02 |
| 4. | वरिष्ठलिपिकः | 01 |
| 5. | विद्युत्कारः | 01 |
| 6. | कनिष्ठलिपिकः | 02 |
| 7. | नलकूपप्रचालकः | 01 |
| 8. | बहुकार्यकर्मचारी | 05 |
| | **योग** | **14** |

# केन्द्रीयलोकसूचनाधिकारी/केन्द्रीयसहायकलोकसूचनाधिकारी (सूचनायाः अधिकारः अधिनियमः, 2005 इत्यस्य अन्तर्गतः) इत्यस्य विवरणम्

सूचनायाः अधिकाराधिनियमः, 2005 इत्यस्य प्रभाविकार्यान्वयनार्थं विश्वविद्यालयस्य निम्नलिखित-कर्मचारिणः, अधिकारिणः केन्द्रियजनसूचनाधिकारिणः (CPIO)/केन्द्रियसहायकजनसूचनाधिकारिरूपेण नामाङ्किताः सन्ति।

| क्र.सं. | नाम, पदनाम एवं सम्पर्क सूत्रम् | पदस्य नाम | सूचनायाः क्षेत्रम् |
|---|---|---|---|
| 1. | डॉ. अलका राय,<br>वित्त अधिकारिणी<br>एवं कुलसचिवा (प्रभारी)<br>011-46060567 | प्रार्थनाधिकारी | कोऽपि जनः यः सी.पी.आई.ओ./सी.ए.पी.आई.ओ.तः निर्दिष्टसमये सूचनां/उत्तरम्/निर्णयं न प्राप्नोति च यदि स पीडितः तर्हि आर.टी.आई 2005 वर्षस्य अधिनियमानुसारं प्रार्थनाधिकारिणे प्रार्थनां कर्तुं शक्नोति। |
| 2. | श्रीअजयकुमारटण्डनः<br>उपकुलसचिवः (लेखा एवं विकासः)<br>011-46060521 | पारदर्शिताधिकारी | सूचनाः वेबसाइटमध्ये प्रकाशन-(अपलोड) सम्बद्धपारदर्शिता। |
| 3. | श्रीबनवारीलालवर्मा<br>प्रणाली प्रबन्धकः<br>011-46060616 | नोडल अधिकारी एवं केन्द्रीयसहायक-जनसूचनाधिकारी | सूचनायाः अधिकाराधिनियमः, 2005 तमवर्षस्य प्रदत्तानां नोडल-अधिकारी और केन्द्रीय-सहायकजन-सूचनां कृते अधिकारिणां कर्तव्यानि तथा उत्तरदायित्वम्। |
| 4. | प्रो. जयकान्तसिंहशर्मा<br>पीठप्रमुखः, वेदवेदाङ्गपीठम्<br>011-46060643 | केन्द्रीयजन-सूचनाधिकारी | वेद-वेदाङ्गपीठसम्बद्धाः सूचनाः। |
| 5. | प्रो. केदार प्रसाद परोहा,<br>पीठप्रमुखः, दर्शनशास्त्रपीठम्<br>011-46060527 | केन्द्रीयजन-सूचनाधिकारी | दर्शनशास्त्रपीठसम्बद्धाः सूचनाः। |
| 6. | प्रो. सदनसिंहः,<br>पीठप्रमुखः एवं विभागाध्यक्षः<br>शिक्षाशास्त्रपीठम् (शिक्षा)<br>011-46060636 | केन्द्रीयजन-सूचनाधिकारी | शिक्षाशास्त्रपीठसम्बद्धाः सूचनाः। |
| 7. | प्रो. शीतलाप्रसादशुक्लः,<br>पीठप्रमुखः, साहित्य-एवं-संस्कृतिपीठम्<br>011-46060518 | केन्द्रीयजन-सूचनाधिकारी | साहित्यसंस्कृतिकपीठसम्बद्धाः सूचनाः। |

| | | | |
|---|---|---|---|
| 8. | प्रो. सविता, संकायप्रमुखः<br>आधुनिकविषयपीठम्<br>011-46060527 | केन्द्रीयजन-<br>सूचनाधिकारी | आधुनिकविषयपीठसम्बद्धाः सूचनाः। |
| 9. | प्रो. नीलम ठगेला<br>संकायप्रमुखा, छात्रकल्याणसंकाय<br>011-46060621 | केन्द्रीयजन-<br>सूचनाधिकारिणी | छात्रकल्याणपीठसम्बद्धाः सूचनाः। |
| 10. | प्रो. महेशप्रसादसिलोडी,<br>विभागाध्यक्षः, साङ्ख्ययोगविभागः<br>011-46060641 | केन्द्रीयजन-<br>सूचनाधिकारी | आहत्य सङ्कायसम्बद्धाः सूचनाः। |
| 11. | प्रो. बिहारीलालशर्मा<br>निदेशकः-आई.क्यू.ए.सी.<br>011-46060651 | केन्द्रीयजन-<br>सूचनाधिकारी | आई.क्यू.ए.सी., एंटी रैगिंग सेल तथा कुलानुशासकसम्बद्धाः सूचनाः। |
| 12. | प्रो. के. भरतभूषणः,<br>आचार्यः एवं नोडल-अधिकारी,<br>स्थाननप्रकोष्ठः<br>011-46060689 | केन्द्रीयजन-<br>सूचनाधिकारी | स्थाननप्रकोष्ठसतर्कतासम्बद्धाः सूचनाः। |
| 13. | प्रो. दिवाकरदत्तशर्मा,<br>मुख्यसतर्कता अधिकारिणी<br>9910000824 | केन्द्रीयजन-<br>सूचनाधिकारी | सतर्कतासम्बद्धाः सूचनाः। |
| 14. | प्रो. शिवशङ्करमिश्रः,<br>विभागाध्यक्षः, शोधविभागः<br>011-46060609 | केन्द्रीयजन-<br>सूचनाधिकारी | शोध एवं प्रकाशनविभागसम्बद्धाः सूचनाः। |
| 15. | प्रो. जगदेवकुमारशर्मा<br>प्रमुखः (हिन्दीराजभाषासमितिः)<br>011-46060525 | केन्द्रीयजन-<br>सूचनाधिकारी | केन्द्रीयराजभाषासम्बद्धाः सूचनाः। |
| 16. | प्रो. अमितापाण्डेयभारद्वाजः<br>आचार्या, निदेशका<br>(शिक्षण-अधिगम-केन्द्रम्)<br>9811580640 | केन्द्रीयजन-<br>सूचनाधिकारिणी | PMMMNMTT (TLC)<br>परियोजनासम्बद्धाः सूचनाः। |
| 17. | प्रो. सुमनकुमारझा<br>आचार्यः एवं नोडलअधिकारी,<br>आजीविकापरामर्शप्रकोष्ठः<br>011-46060546 | केन्द्रीयजन-<br>सूचनाधिकारी | आजीविकापरामर्शप्रकोष्ठसम्बद्धाः सूचनाः। |
| 18. | प्रो. मीनाक्षी मिश्रा<br>आचार्या एवञ्च छात्रावाससंरक्षिका<br>(छात्रावर्गः) 011-46060675 | केन्द्रीयजन-<br>सूचनाधिकारी | विश्वविद्यालयस्य छात्रा छात्रावास एवञ्च राष्ट्रीयच्छात्रसेवा (छात्रावर्गः) सम्बद्धाः सूचनाः। |

| | | | |
|---|---|---|---|
| 19. | श्री मनोजकुमारमीणा, सहायकाचार्यः-शारीरिकशिक्षा 011-46060528 | केन्द्रीयजन-सूचनाधिकारी | विद्यापीठस्य शारीरिकशिक्षा/क्रीडागतिविधिः/व्यायामशालासम्बद्धाः सूचनाः। |
| 20. | डॉ. अभिषेक तिवारी सहायकाचार्यः, एन.सी.सी.प्रमुखः 9654039797 | केन्द्रीयजन-सूचनाधिकारी | एन.सी.सी. छात्र वर्गसम्बद्धं परिज्ञानम्। |
| 21. | डॉ. सुरेन्द्रमहतो, सहायकाचार्यः (शिक्षाशास्त्रम्) एवं सम्पर्काधिकारी | केन्द्रीयजन-सूचनाधिकारी | सम्पर्काधिकारी (ओ.बी.सी) इत्यनेनसे सम्बद्धाः सूचनाः। |
| 22. | डॉ. कान्ता उप-कुलसचिवः (परीक्षा) 011-46060520 | केन्द्रीयजन-सूचनाधिकारी | परीक्षाविभागसम्बद्धं परिज्ञानम्। |
| 23. | श्री रमाकान्त उपाध्यायः, कार्यकारी-अभियन्ता (सिविल) 011-46060323 | केन्द्रीयजन-सूचनाधिकारी | अभियान्त्रिकीविभागसम्बद्धाः सूचनाः। |
| 24. | श्री राजेशकुमारपाण्डेयः सहायक-पुस्तकालयाध्यक्षः 011-46060532 | केन्द्रीयजन-सूचनाधिकारी | पुस्तकालयसम्बद्धाः सूचनाः। |
| 25. | श्रीमति सुषमाडेमला, सहायक-कुलसचिवा (लेखा) 011-46060559 | केन्द्रीयजन-सूचनाधिकारी | लेखा एवं वित्तानुभागसम्बद्धाः सूचनाः। |
| 26. | श्री सुच्चासिंहः सहायक-कुलसचिवः (शैक्षणिक) 011-46060548 | केन्द्रीयजन-सूचनाधिकारी | शैक्षणिकानुभागः, छात्राणां संबंधितविषयाः तथा एससी/एसटी/ओबीसी/पीएच आदि संम्बद्धसूचनाः। |
| 27. | श्री मञ्जीतसिंहः सहायक-कुलसचिवः (शिक्षणेतरम् एवं चयनम्) 011-46060556 | केन्द्रीयजन-सूचनाधिकारी | 1. गैर-शैक्षणिकविभागसम्बद्धाः तथा जनसूचनाधिकारविषयसंम्बद्धसूचनाः।<br>2. मंत्रालयः/यूजीसी के सांसदीयप्रश्न, कोर्ट केस तथा चयन आदि सम्बद्धाः सूचनाः |
| 28. | श्रीमती भारतीत्रिपाठी सहायक-कुलसचिवा (शैक्षणिकम्) 011-46060501 | केन्द्रीयजन-सूचनाधिकारी | 1. शैक्षणिकविभाग एवं जनसूचनाधिकार सम्बद्धसूचनाः।<br>2. मन्त्रालय/यू.जी.सी. के संसदीयप्रश्न-कोर्ट तथा चयनादि सम्बद्धसूचनाः। |
| 29. | श्री राजेशकुमारः सहायक-कुलसचिवः (विकासः/अनुसूचित-एवं-जनजाति प्रकोष्ठः) 011-46060682 | केन्द्रीयजन-सूचनाधिकारी | विकासानुभागः, अनुसूचित जाति/अनुसूचित जनजातिप्रकोष्ठ, अतिथिगृह एवं स्वास्थ्य-केन्द्रसम्बद्धाः सूचनाः। |

| | | | |
|---|---|---|---|
| 30. | विपिनकुमारत्रिपाठी<br>शोध सह सांख्यिकी अधिकारी | केन्द्रीयजन-<br>सूचनाधिकारी | अनुसूचितजाति/अनुसूचितजनजातिप्रकोष्ठः<br>एवञ्च सम्बद्धताप्रकोष्ठः |
| 31. | श्री प्रमोदचतुर्वेदी<br>निजी-सचिवः (कुलपतिः)<br>011-46060605 | केन्द्रीयजन-<br>सूचनाधिकारी | कुलपतिकार्यालयसम्बद्धाः सूचनाः। |
| 32. | श्री जी.सी. शर्मा<br>सहायक-प्रोग्रामर (सङ्गणकम्)<br>011-46060645 | केन्द्रीयजन-<br>सूचनाधिकारी | सङ्गणकीयकेन्द्रसम्बद्धाः सूचनाः। |
| 33. | सुश्री तरुणाअवस्थी<br>शोध-सहायिका (शोधविभागः)<br>011-46060634 | केन्द्रीयजन-<br>सूचनाधिकारी | महिलाध्ययनकेन्द्रसम्बद्धाः सूचनाः। |

## जनसूचनाधिकारः वार्षिकप्रत्यर्पितसूचनाप्रणाली-

सी.आई.सी. इत्यस्य अनिवार्यावश्यकतायाः अनुसारं विवरणं मानवसंसाधनविकासमंत्रालयाय, भारत-सर्वकाराय प्रस्तुतमस्ति।

# मूलसंरचना सौविध्यानि च केन्द्रीयग्रन्थागारः



## क. ग्रन्थागारविषये

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयस्य केन्द्रियग्रन्थालयः स्वस्थापनाकालादेव विश्वविद्यालयसमुदायस्य कृते आवश्यकसूचनानां ज्ञानसंसाधनानां च अभिगमनं सौविध्यपूर्णं कर्तुं संरक्षणलक्ष्येण निष्पक्षशिक्षणेन अनुसन्धानवातावरणपर्यन्तमभिगमनसामर्थ्यसमुत्पादनलक्ष्येण च सह अस्तित्वे आसीत्। ग्रन्थालयः महामहोपाध्यायः पद्मश्रीः डॉ. मण्डनमिश्रग्रन्थालयः इति नाम्नाऽपि ज्ञायते। अस्मिन् ग्रन्थालये वेद-पुराण-उपनिषद्-धर्मशास्त्र-योग-ज्योतिष-व्याकरण-वास्तुशास्त्र-साहित्य-दर्शन-पौरोहित्य-आयुर्वेदसहितानां प्रमुखसंस्कृतग्रन्थानां व्यापकः संग्रहोऽस्ति। शिक्षा-दर्शन-मनोविज्ञान-हिन्दी-आङ्ग्लादीनाम् अन्यसमसामयिकविषयाणां च अयं ग्रन्थालयः ज्ञानस्य अभूतपूर्वभण्डागारः अस्ति।

अस्मिन् केन्द्रियग्रन्थालये प्रयोक्तॄणां कृते प्रौद्यौगिक्याधरिता सेवा आरब्धाऽस्ति -

1. साहित्यिकचौर्यकार्यान्वेषकः मृदूपागमः (साफ्टवेयर)-

   केन्द्रियग्रन्थालयः इनफ्लिबनेट इति माध्यमेन प्रदत्त-मूलनामक-पीडीएस इति साहाय्येन च सङ्कायसदस्यानां शोधपत्रेषु शोधाध्येतॄणां शोधप्रबन्धेषु साहित्यिकचौर्यकार्यनिरीक्षणे संलग्नः अस्ति।

2. आरएफआईडी प्रौद्योगिकी इति।
3. स्वयं निरीक्षण इन/आउट प्रणाली (कियोस्क) इति।
4. दृष्टिबाधितप्रयोक्तृणां कृते सौलभ्यम्।

**परिसञ्चरणस्य प्रदत्ताः**

परिसञ्चरण मेज एतद् सुनिश्चेतुं प्रभारी अस्ति यत् शिक्षणसामग्री ग्रन्थालयस्य अन्ते बहिश्चास्ति। सहैव मूलदिशात्मकं सूचनात्मकञ्च साहाय्यं प्रददाति। पुस्तकालयः विशेषाधिकाराणां एवं प्रसंस्करणशुल्क-कर सम्बद्धानां प्रश्नानां समाधानं करोति।

## ग. ग्रन्थागारस्य सेवाविधयः

| पुस्तकालस्य सेवाविधः | विद्यमानाः | | नवनियोजिताः | | योगः | |
|---|---|---|---|---|---|---|
| पाठ्यग्रन्थाः | 9040 | 58,32,675 | 3581 | 1952913 | 1261 | 7,78,5588 |
| सन्दर्भ-ग्रन्थाः | 3568 | 18,06,672 | 1334 | 727502 | 4902 | 25,34,174 |
| ई- ग्रन्थाः | 289 | 8,19,638 | - | - | 289 | 8,19,638 |
| पत्रिकाः | 124 | 1,52,457 | 129 | 1,43,445 | 129 | 1,43,445 |
| ई-पत्रिकाः | 08 | 2,82,86 | 06 | 1,47,178 | 14 | 17,5464 |
| 'डिजिटलडेटाबेस' इति | 518 | - | - | - | 518 | - |
| सान्द्रमुद्रिका चलचित्राणि च | | - | - | | | |
| अन्याः (उल्लेखिताः) | - | - | | | | |

## घ. ग्रन्थागारे निम्नलिखितपुस्तकालयसॉफ्टवेयरमपि स्वचालितं भवति-

| ILMS तन्त्रांशस्य | स्वचालनस्य प्रकृतिः (पूर्णरूपेण अथवा आंशिकरूपेण) | संस्करणम् | स्वचालनवर्षम् |
|---|---|---|---|
| LIBSYS | पूर्णरूपेण | 10 | 2010-11 |

## ङ. संग्रहित संसाधनां विवरणम्

| संग्रह-संसाधनानि | मार्च 2024 |
|---|---|
| ग्रन्थाः | 1,20,120 |
| शोधपत्रिकाः | 129 |
| शोधप्रबन्धाः | 651 |
| सान्द्रमुद्रिकाः | 131 |

## च. परिसंचरण-सांख्यिकी

सर्कुलेशनपीठिकाग्रन्थागारस्य अन्ते बहिश्च अध्ययनसामग्र्याः अवधानाय अस्ति, मूलभूतदिशात्मक-सूचनात्मकप्रश्नानां समाधानाय, ग्रन्थागारस्य विशेषाधिकारविषयकजिज्ञासासमाधानाय, शुल्क-दण्ड-सम्बधितकार्याय अपि अस्ति।

| परिसंचरण-संसाधनानि | अप्रैल 2023-मार्च 2024 |
|---|---|
| निर्गमनम् | 9348 |
| प्रत्यर्पितम् | 9535 |
| नवीकरम् | 4027 |
| अन्या पुस्तकेतर सामग्री | 1962 |
| **योगः** | **24872** |

## छ. ई-संसाधन सांख्यिकी (प्रत्यक्ष सदस्यता)

केन्द्रीयग्रन्थागार: छात्राणां शोधार्थीनाञ्च लाभाय इलेक्ट्रॉनिकसंग्रहप्रबन्धनस्य विधिं दृष्टिकोणञ्च विकसति। एतत्प्रतिवेदनं विश्वविद्यालयद्वारा इलेक्ट्रॉनिकसंसाधनानामुपयोगस्य महत्त्वं समीक्षाञ्च प्रकाशयति-

| संसाधन | | 2023 | | | | | | | | | 2024 | | | Total |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| | | अप्रैल | मई | जून | जुलाई | अगस्त | सित | अक्तू | नम्ब. | दिस. | जन. | फर. | मार्च | |
| ज्ञानकोष:-पुस्तकालय एवं सूचना प्रबन्धन जर्नल | सदस्यता | 3 | 3 | 0 | 3 | 0 | 0 | 0 | 0 | 5 | 8 | 9 | 0 | 32 |
| ज्ञान एवं संचार प्रबन्धन जर्नल | सदस्यता | 6 | 2 | 0 | 5 | 5 | 1 | 0 | 0 | 0 | 0 | 1 | 0 | 20 |
| ग्रन्थागार हेरल्ड | सदस्यता | 3 | 5 | 0 | 0 | 0 | 0 | 5 | 4 | 7 | 0 | 0 | 0 | 24 |
| पर्ल : ग्रन्थागारस्य सूचना विज्ञानस्य च पत्रिका | सदस्यता | 0 | 3 | 0 | 0 | 0 | 3 | 5 | 4 | 9 | 0 | 0 | 0 | 24 |
| सूचनाविज्ञानस्य पत्रिका विश्व-डिजिटलग्रन्थभागार: | सदस्यता | 0 | 3 | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 3 |
| त्रैमासिकभारत | सदस्यता | 0 | 0 | 0 | 2 | 0 | 0 | 0 | 0 | 2 | 0 | 0 | 0 | 4 |

## अवधौ पुस्तकालयस्य कर्मचारिणां विविधकार्यक्रमेषु सहभागिता-

| क्र.सं. | कार्यक्रमस्य नाम | दिनांक: | पुस्तकालयत: प्रतिभागिता |
|---|---|---|---|
| 1. | ड्रिलविट् पीडी एस सॉफ्टवेयर इत्याधारेण कार्यशाला | 15 फरवरी, 2024 | 02 |

## केन्द्रीयग्रन्थागारे कार्यरतकर्मचारिणां विवरणम् (पदक्रमेण)-

| क्र.सं. | पदस्य नाम | कर्मचारीणां संख्या |
|---|---|---|
| 1. | सहायक-पुस्तकालयाध्यक्ष: | 01 |
| 2. | प्रोफेशनल-सहायक: | 02 |
| 3. | सेमी-प्रोफेशनल-सहायक: | 02 |
| 4. | पुस्तकालयसहायक: | 03 |
| 5. | पुस्तकालयपरिचर: | 04 |

केन्द्रीयग्रन्थालयद्वारा अक्टूबरमासस्य 30-31 2023 तमयोः दिनाङ्कयोः "इनोवेटिव एप्रोच इन नॉलेज क्रिएशन, कम्युनिकेशन, एंडप्रिजवेशन : पर्सपेक्टिव फ्रॉम संस्कृत यूनिवर्सिटीज एंड साइब्रेटीज" विषयेऽस्मिन् द्वि दिवसात्मिका अन्ताराष्ट्रियसंगोष्ठी आयोजिता। अस्यामन्ताराष्ट्रियसंगोष्ठ्यां देशविदेशेभ्यः आहत्य त्रिंशतविशेषज्ञाः, अध्यापकाः, शोधार्थिनः, ग्रन्थालयकर्मिणः इत्यादयः सहभागितां गृहीतवन्तः।

## ई-संसाधनानां विवरणम् ( प्रत्यक्षसदस्यता )

छात्राणां शोधाध्येतृणां च हिताय, केन्द्रियग्रन्थालयेन विद्युतसामग्रीणां विशालपरिधिं विविधताञ्च नियन्त्रयितुं पद्धतयः कार्यनीतयश्च विकसिताः सन्ति। इदम् अनुसन्धानं विद्युत्संसाधनानामुपयोगमापने कलायाः स्थितेः निरीक्षणं करोति, विद्युत्संसाधनानामुपयोगकाले विश्वविद्यालयस्य महत्त्वे बलं ददाति।

## आहारसदनम्

विश्वविद्यालयस्य परिसरे आहारसदनस्य व्यवस्थाऽस्ति, यस्य प्रबन्धनं तृत्तीयपक्षस्य भोजनदातृणां भवति। विश्वविद्यालयस्य छात्राणां कर्मचारिणाञ्च कृते उत्तमगुणवत्तायुक्तानि विविधप्रकारकभारतीयव्यञ्जनानि, अल्पाहारव्यञ्जनानि च अतिन्यूनशुल्केन दीयन्ते। परिसरस्य आहारसदने उत्तमा पाकशाला विद्यते। पाकशालायाः कर्मचारिणः छात्राणां कर्मचारिणाञ्च कृते पौष्टिकानि स्वादिष्टानि च व्यञ्जनानि दातुं यथा-संभव-प्रयत्नान् कुर्वन्ति। सर्वेषु कार्यदिवसेषु आहारसदनं प्रातः 9:30 तः सायं 6:00 वादनपर्यन्तम् उद्घाटितं भवति।





## दिव्याङ्गानां कृते सौविध्यानि

विश्वविद्यालयः दिव्याङ्गजनानां कृते सौविध्यानि प्रदातुमुत्सुकः अस्ति। अस्माकं विश्वविद्यालयस्य परिकल्पना, निर्माणञ्च दिव्याङ्गजनानां मूलभूतानाम् आवश्यकतानां मनसि निधाय मैत्रीपूर्णं वातावरणं प्रदातुं कृतमस्ति। अयं सर्वविधदिव्याङ्गजनानां कृते अनुकूलः परिसरः विद्यते। अस्माकं विश्वविद्यालयः शारीरिकरूपेण दिव्याङ्गजनानां कृते चक्रासन्दाः, रुग्णकटेत्यादीनि भौतिकसौविध्यानि प्रददाति। परिसरे प्राकारावृत्त (रैम्प) इति सौविध्यमपि विद्यते। दिव्याङ्गानाम् अनुकूलाः शौचालयाः अपि उपलभ्यन्ते।







## पर्यावरणसुरक्षितपरिसरः OASIS हरितवातावरणम् 24X7 संरक्षणम् एवं ई-चार्जिग-स्थानकैः सह व्यवस्थितं वाहनस्थापनस्थलम् -

विश्वविद्यालयस्य हरितवर्णीयः परिसरः केवलं दृश्यं न अपितु पर्यावरणदायित्वं प्रति प्रतिबद्धोऽस्ति। प्रमुखस्थानेषु नीत्यनुरूपं योजनाबद्धरूपेण च सीसीटीवी इति चित्रग्राहकाः स्थापिताः सन्ति, चतुर्विंशतिहोराः यावत् निरीक्षणं सुनिश्चितं कृतमस्ति, सर्वेषां कृते सुरक्षितं वातावरणं प्रदातुं महिलासुरक्षिकाभिः सह बहूनां सुरक्षारक्षकाणां समर्पितं दलं निर्मितम्। सौविध्यानि वर्धयितुं, वाहनस्थापनास्थलानां विस्तारः कृतः एवञ्च स्थायिभविष्यं प्रति प्रतिबद्धतया गौरवेण च सह ई-चार्जिगस्थानकानि प्रदत्तानि सन्ति।


















## क्रीडाक्षेत्रम्/क्रीडाङ्गणम् - विश्वविद्यालयपरिसरे एका क्रीडा ओडिसी-

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालये सावधानेन सज्जीकृतं क्रीडाक्षेत्रं, यत्र क्रीडा सौहार्दञ्च सहैव दृश्येते। उन्मुक्तबैडमिण्टनक्रीडाक्षेत्रं (168 मीटर), वॉलीबॉलक्रीडाक्षेत्रं (880 मीटर) मल्लयुद्धक्षेत्रं (750 मीटर), क्रिकेटक्रीडाक्षेत्रं (3900 मीटर) बास्केटबॉलक्रीडाक्षेत्रं (810 मीटर), बाह्यशारीरिकस्वास्थ्यरक्षणं चेत्यादीनां पर्याप्तं क्षेत्रमस्ति। एतानि विविधक्रीडाङ्गणानि न केवलमुत्साहयुतस्पर्धानामायोजनं कुर्वन्ति अपितु समग्रं विकासं वर्धयन्ति, येन ऐतेषु पवित्रेषु क्षेत्रेषु स्मृतीनां रेखा निर्मीयते।












## बहुमुखिस्थानम्-अत्याधुनिकसौविध्यानां शैक्षणिकानुभवानां च वर्धनम्

अस्मिन् विश्वविद्यालयपरिसरे चतु:शतस्य (400) जनानाम् आसनक्षमतायुक्तः बहूद्देशीयः बृहदालयः विद्यते, यः उन्नतध्वनिप्रणालिभिः, परिष्कृतप्रकाशव्यवस्थया आधुनिक-सौविध्येन च सुसज्जितः अस्ति। अयं भव्यायोजनानां शैक्षणिकचर्चानां केन्द्ररूपेण कार्यं करोति। एवञ्च विंशतितः अशीतेः जनानामासनव्यवस्थायुक्तानां सप्तसमित्यालयानां निर्माणमपि कृतमस्ति, येषु प्रत्येकं समित्यालयेषु प्रक्षेपणयन्त्रं, पटानि (स्क्रीन्), ध्वनिमुद्रणयन्त्राणि च सन्ति। एते आलयाः सहयोगात्मकचर्चानां प्रस्तुतीनां सद्यस्क- (Online) सङ्गोष्ठीनां च कृते निर्मिताः सन्ति, ये अस्माकं शैक्षणिकस्थानानां बहुमुखप्रतिभां वर्धयन्ति।











## आभासीयकक्षाकक्षः/स्टूडियो

विश्वविद्यालयेन केन्द्रीकृत-रिकार्डिङ्ग-नियन्त्रणमञ्चेन सह आभासीयकक्षः/स्टूडियो स्थापितमस्ति यस्योपयोगः सर्वाधिकः सुलभोऽस्ति तथा च समृद्ध-माध्यम-लाइव-वेबकास्टिंग-सामग्रीप्रबन्धनस्य, वेब-मोबाइल-वितरण-प्रणाल्याः च कृते सर्वोत्तमः-समर्थितश्चास्ति। यस्मिन् हार्डवेयरसॉफ्टवेयरसहितं पूर्णतया एकीकृतसमाधानम् अस्ति, सञ्जालीकरणं, श्रव्यदृश्यसम्मेलनं, नियन्त्रणप्रणाली केन्द्रीकृतं रिकार्डिङ्गं नियन्त्रणप्रणाली च समावेशिसंकुलं भविष्यति।






## विश्रान्तिनिलयम्/अतिथिगृहम्

अतिथिगृहं विश्रान्तिनिलयमिति नाम्ना विश्वविद्यालयस्य एका अव्यावसायिकान्वितिरस्ति। एवञ्च अस्योपयोगः शैक्षिकोद्देश्यानां पूर्त्यर्थं क्रियते। विश्वविद्यालयपरिसरे द्वितलयुक्तम् अतिथिगृहभवनमस्ति। अस्मिन् द्विपर्यङ्कयुक्ताः अष्ट प्रकोष्ठाः, अत्यन्तं महत्त्वपूर्णानां जनानां कृते पूर्णसौविध्ययुक्तं बृहत्प्रकोष्ठद्वयं, भोजनक्षेत्रं कार्यालयक्षेत्रञ्चास्ति। अतिथिगृहेण अनुरोधे कृते सति राष्ट्रियान्ताराष्ट्रियप्रतिनिधिभ्यः/शैक्षणिकानुसन्धान-गतिसम्पादकेभ्यः समागतगणमान्यजनेभ्यः आतिथ्यं प्रदातुं शक्यते।



## छात्रावासः

विश्वविद्यालये छात्राणां कृते छात्रावासः अस्ति। यत्र 51 प्रकोष्ठेषु 99 छात्राणाम् आवासव्यवस्था सुनिश्चिता अस्ति। शोधार्थिभ्यः वरिष्ठच्छात्रेभ्यश्च एकस्थानीयाः 16 प्रकोष्ठाः सन्ति, इतरेभ्यः द्विस्थानीयाः 18 प्रकोष्ठाः, त्रिस्थानीयाः 17 प्रकोष्ठाः च वर्तन्ते। छात्रावासः अत्याधुनिकव्यवस्थाभिः युक्तः अस्ति। यत्र लोकल एरिया नेटवर्क, संगणकम्, दूरदर्शनं दूरवाणी, सामान्यप्रकोष्ठः, भोजनसभागारः, पाकशाला, खाद्यद्रव्यागारः च वर्तन्ते।

डॉ. सुन्दरनारायणझावर्यः 2020-2021 तमे वर्षे छात्रावासस्य प्रभार्यधिष्ठातृरूपेण कार्यं निर्वहति।




## मनोरञ्जनकक्षम्

विश्वविद्यालयस्य महिलाकार्यकर्त्रीभ्यः मनोरञ्जनार्थं परस्परमेलनार्थञ्च विश्वविद्यालये मनोरञ्जनप्रकोष्ठः निर्मितोऽस्ति। महिलाभ्यः तासां रिक्तसमये विश्रान्तिम्, अध्ययनम् अनौपचारिकसम्भाषणञ्च कर्तुं प्रकोष्ठः निर्मितः। तत्र आन्तरिकक्रीडा स्वास्थ्यसंरक्षणोपकरणानि च विद्यन्ते। पीडानिवारणाय पूर्णशरीरसम्मर्दनयन्त्राणि उपलब्धानि सन्ति। सामुदायिकवाचनालये कर्मचारिणामुपयोगाय वार्तापत्रिकाः पत्रिकाश्च उपलब्धाः सन्ति।



## व्यायामशाला

विश्वविद्यालये सर्वेषां छात्राणां कृते अत्युत्कृष्टव्यायामशालायाः सौविध्यमुपलब्धमस्ति। स्वस्थशरीरे स्वस्थं मनः निवसति इति प्रसिद्धिः। छात्राणां कृते व्यावसायिकरूपेण प्रबन्धितं वातावरणं स्थाप्यते। जनानां शारीरिकं मानसिकञ्च स्वास्थ्यं तेषां समग्रकल्याणे आवश्यकं कारकमस्ति। परिसरे पूर्णतया वातानुकूलिता आन्तरिक-गुणवत्तायुक्ता व्यायामशाला अस्ति, या छात्राणां सर्वाङ्गीणविकासस्य लक्ष्यं मनसि निधाय निर्मिताऽस्ति। अस्यां व्यायामशालायाम् उच्चस्वास्थ्ययुक्तोपकरणानि यथा- धावकयन्त्रं (ट्रेडमिल) अन्यानि उत्कृष्टयन्त्राणि सन्ति। संक्षेपेण व्यायामशाला छात्रेभ्यः शारीरिक-मानसिकरूपेण विकासयितुं स्वस्थं वातावरणं प्रददाति।




## देवसदनम् ( मन्दिरम् )

विश्वविद्यालयपरिसरे स्थितस्यास्य देवसदनस्य अत्र दैनन्दिनजीवनस्य सर्वेषु पक्षेषु महत्त्वपूर्णा भूमिकाऽस्ति। इदं देवसदनं न केवलं स्वीयधार्मिकविशेषतानां कृते, अपितु सांस्कृतिक-सामाजिकशैक्षणिकगुणानां कृतेऽपि उल्लेखनीयमस्ति, यदिदं संस्कृतविश्वविद्यालयपक्षतः समुदायाय प्रेरणां प्रददाति। मन्दिरं हिन्दूधर्मस्य दैनिकजीवनाय महत्त्वपूर्णः आयामः अस्ति। हिन्दूजनानां कृते मन्दिरं दर्शनीयायाः प्रशंसनीयायाः संरचनायाः अपि अधिकं समादरणीयमस्ति। एतत् दैनन्दिनजीवनस्य बौद्धिक-कलात्मक-आध्यात्मिक-शैक्षिक-सामाजिकतत्त्वानां केन्द्रं वर्तते। विश्वविद्यालये प्रतिवर्षं विशिष्टार्चनया सहैव नूतनसत्रस्यारम्भः भवति।



## आवासीयभवनानि

विश्वविद्यालये शैक्षणिकशैक्षणिकेतरकर्मचारिणां कृते 48 आवासीयभवनानि निर्मितानि सन्ति। तेषु 7 आवासीयभवनानि वर्ग-V इत्यस्य कृते, 8 आवासीयभवनानि वर्ग-IV इत्यस्य कृते, 8 आवासीयभवनानि वर्ग-III इत्यस्य कृते, 8 आवासीयभवनानि वर्ग-II इत्यस्य कृते, 16 आवासीयभवनानि वर्ग-I इत्यस्य कृते च सन्ति। एतदतिरिक्तं कुलपत्यावासभवनं निर्मितमस्ति।



## शिशुसदनम्

कार्यकर्त्रीणां मातृणां कृते शिशूनां सुरक्षा सर्वदा चिन्तायाः मुख्यः विषयः भवति। विश्वविद्यालये कार्यकर्त्रीणां मातृणां (शैक्षणिक-गैरशैक्षणिककर्मचारिणीनां) गृहस्य च कार्यालयस्य च द्विगुणितायाः भूमिकायाः परिपालने सहयोगप्रदानार्थम् एकं शिशुसदनं निर्मितम्। येन तासां बालानां कल्याणसम्बद्धपरिश्रान्तिः न्यूनीभवति। विश्वविद्यालयस्य शिशुसदनस्योद्देश्यं विश्वविद्यालयस्य कर्मचारिणीनां बालानां कृते विश्रान्तियुक्तं सुरक्षितञ्च वातावरणं प्रददाति। एतत् केन्द्रं विश्वविद्यालयस्य कर्मचारिणीनां कृते अत्यन्तमुपयुक्तं सौविध्यम् उपस्थापयति। यतोहि अत्र दिवसे शिशूनां लघुबालानाञ्च पर्यवेक्षणं संरक्षणञ्च क्रियते, येन तेषां पितरौ विशेषतः मातरः स्वकार्यं निरन्तरं कर्तुं समर्थाः भवेयुः।



## वेधशाला

ज्योतिषविभागीयच्छात्रेभ्यः सिद्धान्तज्योतिषस्य व्यावहारिकं ज्ञानं प्रदातुं विश्वविद्यालयपरिसरे एका वेधशाला विद्यते। एषा जयपुरस्य जंतर-मंतर इत्यस्य तत्कालीनविभागाध्यक्षेण, राष्ट्रपतिपुरस्कारविजयितृणा स्वर्गीयेण एम्. पण्डितेन कल्याणदत्तशर्ममहोदयेन संस्थापिता। अस्यां वेधशालायां कर्कवलयः, तुलावलयः, मकरवलयः चेत्यादीनि यन्त्राणि उपलभ्यन्ते, यानि राशिविषयस्य ज्ञानार्थम् उपकारकाणि सन्ति। तथैव भित्तियन्त्रं चक्रयन्त्रं च क्रान्तेः ज्ञानप्राप्त्यर्थं साहाय्यं कुरुतः। नाडीवलययन्त्रेण स्थानीयसमयज्ञानं सम्भवति। सम्राट्यन्त्रं याम्योत्तर-लङ्घनकालं, स्थानीयकालं मानककालं च ज्ञापयति। भारतीयतारामण्डल-नटांशः अक्षांशान्वेषणे क्रान्त्यन्वेषणे च साहाय्यं करोति।




## यज्ञशाला

बृहस्पतिभवने एका यज्ञशाला निर्मिता वर्तते, यत्र राजधान्यां विद्यमानानाम् अर्चकानां कृते डिप्लोमा तथा प्रशिक्षणपाठ्यक्रमः आयोजितः वर्तते। अस्मिन् वर्षे यज्ञशालायां नैकानि यज्ञानुष्ठानानि आयोजितानि। यज्ञशालायां



वैदिकानुष्ठानानां यज्ञविधानानां च कृते विविधप्रकारकाणि भद्रमण्डलानि निर्मितानि सन्ति। यथा – सर्वतोभद्रमण्डलं, चतुर्भद्रमण्डलं, वास्तुमण्डलं, एकषष्टिपदवास्तुमण्डलं, नवग्रहमण्डलं, षोडशमातृकामण्डलं, सप्तघृतमातृकामण्डलं, क्षेत्रपालमण्डलं, योगिनीमण्डलम् एवं विविधप्रकारकाणि मण्डलानि चित्रितानि सन्ति। यज्ञशालायां गुरुशिष्यपरम्परया अध्ययनम् अध्यापनं च भवति। गुरुः शिष्यश्च विधिवत् भूमौ कटे उपविश्य विशिष्टवेशभूषायां स्वाध्यायम् अध्यापनं च कुरुतः। एतदतिरिच्य यज्ञशालायां प्रत्यक्षरूपेण विभिन्नाः गतिविधयः सम्पाद्यन्ते।

## श्रौतयज्ञ प्रयोगशाला

यथा वयं सर्वे जानीमः यत् सर्वेषां धर्माणां मूलसिद्धान्तः वेदाः एव, ये कर्मज्ञानयोः माध्यमेन धर्मं प्रवर्तयन्ति। एतेषु कर्ममार्गः यज्ञधर्मरूपः। अधिकांशः वेदाः एतस्य यज्ञविद्यां प्रस्तावयन्ति। एते सर्वे यज्ञप्रयोगाः प्रत्यक्षतया वैज्ञानिकप्रयोगाः सन्ति। प्राचीनऋषिवैज्ञानिकाः मानवजातेः हिताय विविधान् यज्ञप्रयोगान् कुर्वन्ति स्म। यथा अद्यत्वे वैज्ञानिकाः विविधप्रयोगान् कर्तुं कस्याः अपि प्रयोगशालायाः उपयोगं कुर्वन्ति, तथैव ते प्राचीनऋषिवैज्ञानिकाः अपि एतान् वैज्ञानिकयज्ञप्रयोगान् कर्तुं यज्ञशालानाम् उपयोगं कुर्वन्ति स्म । अतः नानायज्ञप्रयोगान् कर्तुं यज्ञशालाः समानप्रयोजनानुसारं परिकल्पिताः भवन्ति । यज्ञेषु अहिताग्नियजमानेन आजीवनं केचन यज्ञाः कर्तव्याः भवन्ति । एतादृशानां यागानां कृते एतादृशः इष्टियागविहारः इव स्थायी यगशल्लाः विहितः अस्ति। अस्मिन् विहारे अग्निहोतृयजमानस्य सम्पूर्णायुषः ये यागाः करणीयाः सन्ति, यथा नित्यं सायं-प्रातरग्निहोत्रः, दर्शपूरणमसेष्ठियागः, आग्रहणेष्टियागः इत्यादयः। यतो हि एषा वेदी सर्वेषां यज्ञसंस्काराणाम् आधारः अस्ति, यदा कदापि अस्माभिः यज्ञसम्बद्धः कोऽपि संस्कारः अध्ययनं वा कर्तव्यं भवति तदा तादृशीं वेदीं विना असम्भवम् । वेदीयाः एताम् आवश्यकताम् अवगत्य माननीयकुलपतिः प्रो. मुरलीमनोहरपाठकः श्रौतयज्ञप्रयोगानाम् अध्ययनार्थं वेदविभागस्य छात्रान् आमन्त्रितवान् । प्रो. मुरलीमनोहरपाठकः इत्यनेन कात्यायनश्रौतसूत्रानुसारं निर्मितस्य विश्वविद्यालयस्य परिसरे "श्रौतेष्ठियागविहारः" इति नामकश्रौतयगशाला निर्मिता अस्ति।





## वर्षाजलसञ्चयनप्रणाली

विश्वविद्यालये 2004-05 तमे वर्षे केन्द्रीयभूमिगतजलपरिषदः, जलसंसाधनमन्त्रालस्य, भारतसर्वकारस्य वरिष्ठवैज्ञानिकानां च मार्गदर्शने C.G.W.B. इत्यस्य च प्रस्तावानुसारं चतुर्षु भिन्नभिन्नस्थानेषु आहत्य सप्तवर्षाजलसंचयनगर्तान् (बोर) निर्मीय वर्षाजलसंचयस्य समुचितव्यवस्था क्रियते।



## छदिः-सौर-ऊर्जासंयत्रम्

मैसर्स एज्योर पावर रूफ टॉप वन प्रा. लिमिटेड एजेंसी इति भारतसर्वकारस्य छदिसौर-उर्जा-संयन्त्रस्य, नवीनस्य नवीकरणीयस्य ऊर्जामन्त्रालयस्य च सौर-ऊर्जानिगमाधीनमस्ति। भारतसर्वकारेण विद्यमानविश्व-विद्यालयभवनच्छदिषु रेस्को मोड इत्यस्मिन् 151.27 KWp इति सौर-ऊर्जासंयन्त्रं स्थापितम् अस्ति।



## मलजलशोधनसंयन्त्रम्

विश्वविद्यालयेन 2006-07 तमे वर्षे फिल्टर प्रेस इत्यनेन सह (120 कि.ली. प्रतिदिनं क्षमतायाः) एकं नवीनतमं एफ.ए.बी प्रकारकं सीवेज ट्रीटमेंट प्लांट स्थापितम् अस्ति। विश्वविद्यालयीयपरिसरस्य पाकशालासु, स्नानागारेषु, शौचालयादिषु उत्पन्नस्य अवशिष्टस्य जलस्य उपयोगः विश्वविद्यालयीयपरिसरेषु आवासीयेतर-भवनानां शौचालयेषु शुद्ध्यर्थं कृषिकार्यार्थञ्च पुनरुपयोगस्य उद्देश्येन स्थापितमस्ति। विश्वविद्यालयः शतप्रतिशद्-अशुद्धापशिष्टजलस्य उपयोगं एस.टी.पी इति माध्यमेन करोति तथा च प्रभाविरूपेण अस्य उपयोगः आवर्षं विश्वविद्यालयस्य वाटिका-उद्यानादीनां सुव्यवस्थायै विकासाय, (वर्षर्तौ कानिचन् दिनानि विहाय) आवासेतरभवनानां शौचालयस्वच्छतायै च क्रियते। अपशिष्टजलस्य उपचारानन्तरमुत्पन्नस्य स्थूलापशिष्टस्य फिल्टर प्रेस इत्यनेन उर्वरकरूपेण परिवर्तनं क्रियते। यस्योपयोगः कृषिकार्येषु भवति। एवं प्रकारेण विश्वविद्यालयः सम्पूर्णवर्षे उपचारितापशिष्टजलस्य उपयोगं करोति। सीवेज ट्रीटमेंट प्लांट इति अहर्निशं कार्यं करोति। कृषिकार्यार्थञ्च पुनरुपयोगस्य उद्देश्येन स्थापितमस्ति। विश्वविद्यालयः शतप्रतिशद्- अशुद्धापशिष्टजलस्य उपयोगं एस.टी.पी इति माध्यमेन करोति तथा च प्रभाविरूपेण अस्य उपयोगः आवर्षं विश्वविद्यालयस्य वाटिका-उद्यानादीनां सुव्यवस्थायै विकासाय, (वर्षर्तौ कानिचन् दिनानि विहाय) आवासेतरभवनानां शौचालयस्वच्छतायै च क्रियते। अपशिष्टजलस्य उपचारानन्तरमुत्पन्नस्य स्थूलापशिष्टस्य फिल्टर प्रेस इत्यनेन उर्वरकरूपेण परिवर्तनं क्रियते। यस्योपयोगः कृषिकार्येषु भवति। एवं प्रकारेण विश्वविद्यालयः सम्पूर्णवर्षे उपचारितापशिष्टजलस्य उपयोगं करोति। सीवेज ट्रीटमेंट प्लांट इति अहर्निशं कार्यं करोति।



# क्रीडा, शैक्षणिक-पाठ्येतरगतिविधयश्च

## क्रीडासम्बन्धिनः गतिविधयः

विश्वविद्यालयः छात्राणां कर्मचारिणां च कृते पर्याप्तक्रीडासुविधाभिः सुसज्जितः अस्ति तथा च छात्रसमुदायस्य हिताय क्रीडासंरचनायाः विकासे सक्रियरूपेण संलग्नः अस्ति। स्वस्थशारीरिकमानसिकस्वास्थ्यस्य कृते क्रीडायाः स्वकीयं महत्त्वम् अस्ति। एतत् मनसि निधाय विश्वविद्यालयेन छात्राणां कृते विविधाः क्रीडाः आयोजिताः। डॉ. मनोजकुमारमीणा विश्वविद्यालयस्य क्रीडाप्रभारी अस्ति। विश्वविद्यालये वार्षिकक्रीडा-प्रतियोगितानाम् आयोजनं भवति यथा-योगासन-कुश्ती-कबड्डी-क्रिकेट-बैडमिण्टनरोत्थानम् तदनन्तरं एथलेटिक-कार्यक्रमाः इत्यादयः।

विश्वविद्यालयः छात्राणां कर्मचारिणां च कृते पर्याप्तक्रीडासुविधाभिः सुसज्जितः अस्ति तथा च छात्रसमुदायस्य हिताय क्रीडासंरचनायाः विकासे सक्रियरूपेण संलग्नः अस्ति। श्रीलालबहादुरशास्त्रीराष्ट्रिय-संस्कृतविश्वविद्यालयगणः भारतीयविश्वविद्यालयक्रीडासङ्घस्य (2023-24) वार्षिकपञ्चाङ्गानुसारं अखिल-भारतीयविश्वविद्यालयक्रीडामण्डले उत्तरक्षेत्रान्तरविश्वविद्यालये च भागं गृहीतवान् अस्ति।

### विश्वविद्यालयस्य क्रीडानाम तिथिः, छात्राणां संख्या, प्रशिक्षकः, प्रबन्धकश्च

| क्र. | विश्वविद्यालयस्य नाम | क्रीडा/क्रीडा प्रतियोगिता | अवधिः | छात्राणां, मार्गदर्शकानां प्रबंधकानां च संख्या |
|---|---|---|---|---|
| 1. | गुरुकाशीयूनिवर्सिटी भटिंडा | नॉर्थ जोन इंटर यूनिवर्सिटी कबड्डी चौंपियनशिप (पुरुष) | 19-22 अक्टूबर, 2023 | 11 छात्रः 1 प्रबंधक 1 मार्गदर्शकः |
| 2. | महर्षि-दयानंद-विश्वविद्यालय, रोहतक | उत्तर क्षेत्र अंतर विश्वविद्यालय कुश्ती फ्री स्टाइल और ग्रीको रोमन स्टाइल चौंपियनशिप (एम एंड एफ) | 09-24, नवंबर, 2023 | 11 छात्रः 1 प्रबंधकः 1 मार्गदर्शकः |
| 3. | चितकारायूनिवर्सिटी, राजपुरा | नॉर्थ जोन इंटर यूनिवर्सिटी बैडमिंटन चौंपियनशिप (पुरुष) | 24-29 नवंबर, 2023 | 4 छात्रः 1 प्रबंधकः |
| 4. | चंडीगढ़ विश्वविद्यालय | अखिल भारतीय अंतर विश्वविद्यालय कुश्ती फ्री स्टाइल और ग्रीको रोमन स्टाइल चैंपियनशिप (पुरुष) | 04-11 दिसंबर, 2023 | 12 छात्रः 1 प्रबंधकः |
| 5. | चंडीगढ़विश्वविद्यालय | नॉर्थ जोन इंटर यूनिवर्सिटी बॉक्सिंग चौंपियनशिप (पुरुष) | 20-23 दिसंबर, 2023 | 10 छात्रः 1 प्रबंधकः |
| 6. | कलिंगा इंस्टीट्यूट इंडस्ट्रियल टेक्नोलॉजी, भुवनेश्वर, ओडिशा | अखिल भारतीय अंतर विश्वविद्यालय योग चैंपियनशिप (महिला) | 21-23 दिसंबर, 2023 | 11 छात्रः, 1 प्रबंधकः 1 निदेशकः |

| | | | | |
|---|---|---|---|---|
| 7. | कलिंगा इंस्टीट्यूट इंडस्ट्रियल टेक्नोलॉजी, भुवनेश्वरम्, ओडिशा | अखिल भारतीय अंतर विश्वविद्यालय एथलेटिक्स चैंपियनशिप (पुरुषः) | 25-30 दिसंबर, 2023 | 12 छात्रः, 2 प्रबंधकः 1 निदेशकः |
| 8. | गुरुनानक-देव-यूनिवर्सिटी अमृतसर, पी.बी. | ऑल इंडिया इंटर यूनिवर्सिटी फेंसिंग चौंपियनशिप (पुरुष) | 09-11, जनवरी, 2024 | 1 छात्रः, 1 प्रबंधकः |
| 9. | जम्मू-विश्वविद्यालयः, जम्मू | अखिल भारतीय अंतर विश्वविद्यालय वुशू चौम्पियनशिप (पुरुषः) | 13-17 फरवरी, 2024 | 1 छात्रः, 1 प्रबंधकः |
| 10. | कोहिमा, नागालैंड | राष्ट्रीयस्तर - खेलो इंडिया यूनिवर्सिटी गेम्स | 22-25 फरवरी, 2024 | 3 छात्रः, 2 प्रबंधकः 1 निदेशकः |
| 11. | एसएलबीएसएनएसयू | खेल मैदान वार्षिक खेल टूर्नामेंट | 13-15 मार्च, 2024 | 500-600 छात्रैः भागः गृहीतः |

## राष्ट्रियान्तार्राष्ट्रियस्तरयोः पदकं प्राप्तानां विश्वविद्यालयछात्राणां सूचिः

| क्र.सं | विश्वविद्यालयस्य नाम | क्रीडा/प्रतियोगता | आयोजन तिथि | छात्र-विवरणम् |
|---|---|---|---|---|
| 1. | उमेशशास्त्री मीमांसाविभागीय द्वितीयवर्षस्य छात्रः किर्गिस्तानदेशे अन्तर्राष्ट्रीयस्तरीय ग्रीक रोमन 63 ओलम्पिकप्रतियोगितायां विजयी अभवत्। | | | |
| 2. | महर्षिदयानंदविश्व-विद्यालयः, रोहतकम् | राष्ट्रियस्तरीय-उत्तरपूर्वक्षेत्रीय मल्लयुद्धरप्रतियोगिता | 5तः7 नवम्बरमासे, 2023 वर्षे | रजतपदकः - आकाशः शास्त्री, प्रथमवर्ष (धर्मशास्त्रम्) फ्रीस्टाइल 61 किलोग्रामवर्गे<br>कांस्यपदकः - सनी, शास्त्री प्रथमवर्ष (धर्मशास्त्रम) फ्रीस्टाइल 74 किलोग्रामवर्गे<br>कांस्यपदकः - उमेशः शास्त्री, द्वितीयवर्ष (मीमांसा) ग्रीक-रोमन 67 किलोग्रामवर्गे |
| 3. | चंडीगढ़विश्वविद्यालयः | राष्ट्रियस्तरीय-अखिलभारतीय अंतरविश्वविद्यालयः | 3 तः11 दिसम्बर-मासे, 2023 वर्षे | स्वर्णपदकः - सनी शास्त्री, प्रथमवर्ष (धर्मशास्त्रम्) फ्रीस्टाइल 74 किलोग्रामवर्गे<br>कांस्यपदकः - दीपकः शास्त्री, प्रथमवर्ष (धर्मशास्त्रम्) फ्रीस्टाइल 65 किलोग्रामवर्गे |

| | | | | |
|---|---|---|---|---|
| 4. | कोहिमा, नागालैंड | राष्ट्रियस्तरीय - खेलो इंडिया-विश्वविद्यालयः क्रीडा | 22 तः 25 फरवरी-मासे, 2024 वर्षे | रजतपदकः - आकाशः<br>शास्त्री प्रथमवर्ष (धर्मशास्त्रम्)<br>फ्रीस्टाइल 61 किलोग्रामवर्गे<br>रजतपदकः - सतीशः<br>शास्त्री प्रथमवर्ष (जैनदर्शनम्)<br>ग्रीको रोमन 82 किलोग्रामवर्गे |










## 2. राष्ट्रियप्रोद्यौगिकीदिवसः - 2023

अस्मिन् दिवसे वयम् अस्माकं देशस्य सर्वोत्कृष्टानां नवप्रवर्तकानां वैज्ञानिकानाम् उपलब्धीनाम् औद्योगिक्याः उपयोगितायाः वाणिज्यप्रतिपादनस्य प्रक्रियायाः तेषां साफल्यस्य आनन्दम् आचरामः। यत् सर्वेषां जीवनं परिवर्तयति। विश्वविद्यालयस्य छात्रैः अस्माकं माननीयप्रधानमन्त्रिणां सद्यस्ककार्यक्रमे विज्ञान-प्रोद्यौगिक्याधारेण भागः निर्व्यूढः।

## 3. अन्ताराष्ट्रिय-योगदिवसः

नवमस्य अन्ताराष्ट्रिययोगदिवसस्य आयोजनं 21/06/2023 दिनाङ्के प्रातः अष्टवादने विश्वविद्यालय-परिसरे माननीयानां कुलपतीनाम् अध्यक्षतायाम् अभवत्। भारतीयसर्वकारस्य निर्देशानुसारं, निर्देशितयोगप्रोटोकॉल इत्यस्य पालनपुरस्सरम् आसन-प्राणायामादीनां योगाभ्यासस्य च आयोजनं जातम्। विश्वविद्यालयस्य चतुःशताधिकाः शिक्षकाः कर्मचारिणः छात्राश्च अस्मिन् कार्यक्रमे भागम् अगृह्णन्।

## 4. स्वतन्त्रतायाः अमृतहोत्सवः ( प्रतिगृहं त्रिवर्णध्वजः )

त्रयोदशदिनाङ्कात् पञ्चदशदिनाङ्कं यावत् अगस्तमासस्य 2022 तमे वर्षे विश्वविद्यालये स्वतन्त्रतामृतमहोत्सवः प्रतिगृहं त्रिवर्णध्वजः इति कार्यक्रमाणां समायोजनं कृतम्। शिक्षणकर्मचारिभ्यः शिक्षणेतरकर्मचारिभ्यः छात्रेभ्यः राष्ट्रियध्वजः प्रदत्तः। समेऽपि सामूहिकरूपेण विश्वविद्यालये प्राचलन्। अलौकिकमिदं दृश्यं समेषां प्रेरणायै आसीत्।

## 5. विभाजनविभीषिकास्मृतिदिवसः

14/08/2023 तमे दिनाङ्के विश्वविद्यालये विभाजनविभीषिकास्मृतिदिवसः समाचरितः। यस्याध्यक्षतां छात्रकल्याणसङ्कायप्रमुखः अकरोत्। विभाजनभयावहस्मृतिदिवसः वार्षिक-राष्ट्रियस्मृतिदिवसोऽस्ति। यः प्रत्येकं वर्षे चतुर्दशे दिनाङ्के आयोज्यन्ते। यः 1947 तमे वर्षस्य भारतविभाजनस्य पीडां स्मारयति। प्रप्रथमं दिवसोऽयं प्रधानमन्त्रिणः घोषणायाः परं 2021तः सततम् आचर्यते।



## 6. स्वतन्त्रतादिवसः

अगस्तमासस्य 15 दिनाङ्के 2023 तमे वर्षे विश्वविद्यालयस्य परिसरे 77तमः स्वतन्त्रतादिवससमारोहः आयोजितः। मुख्यभवनस्य समक्षे स्वतन्त्रतादिवससमारोहः आचरितः। समारोहः प्रातः 09:30 वादने प्रारब्धः। तथा च कुलपतिं विश्वविद्यालयस्य एन.सी.सी. छात्रसैनिकाः परम्परानुरोधकं सम्मानरक्षकप्रणाममकुर्वन्। कुलपति-महोदयेन श्रीलालबहादुरशास्त्रिमहोदयस्य प्रतिमायां माल्यार्पणं, राष्ट्रियध्वजोत्तोलनं च कृतम्। अवसरेऽस्मिन् उपस्थितश्रोतृगणेन राष्ट्रगानं गीतम्। विश्वविद्यालयस्य कुलपतिः सर्वान् सदस्यान् विशेषतः एन.सी.सी. छात्रसैनिकान् सम्बोधयन् राष्ट्रस्य गौरववर्धनाय, तस्य रक्षणाय महत्त्वपूर्णां भूमिकां निर्वोढुम् आग्रहं कृतवान्। अवसरेऽस्मिन् कुलपतिमहोदयेन वृक्षारोपणमपि कृतम्।

## 7. अङ्गदानप्रतिज्ञा/अङ्गदानमहोत्सवः 2023

अस्मिन् अवसरे स्वास्थ्यसेवान्वितिद्वारा अङ्गदानसन्दर्भे बाह्यप्रेरकचिकित्सकद्वारा कार्यक्रमः आयोजितः। यत्र समेषां शिक्षकाणां छात्राणां कर्मचारीणां प्रेरणम् अङ्गदानसन्दर्भे विहितम्। सर्वैः अपि आवश्यकतायां क्षमतायां अङ्गदानाय शपथं स्वीकृतम्। अङ्गानां कृते प्रतीक्षारतानां विषये बोधनपूर्वकं जागरुकतासमुत्पादनं कृतम्।

## 8. शिक्षकदिवसः

05.09.2023 तमे दिनाङ्के डॉ. सर्वपल्लीराधाकृष्णन्महोदयस्य जयन्त्यवसरे विश्वविद्यालयेन शिक्षकदिवसः सादरं सोल्लासेन आयोजितः। सः सिद्धः अध्येता, भारतरत्नप्राप्तकर्ता, प्रथमोपराष्ट्रपतिः, स्वतन्त्रभारतस्य द्वितीयः राष्ट्रपतिः च आसीत्। असौ 1949तः 1952 यावत् सोवियतसङ्घे भारतस्य द्वितीयराजदूतरूपेण आसीत्।

## 9. हिन्दीपक्षः

विश्वविद्यालये 14.09.2023तः 29.09.2023 पर्यन्तं हिन्दीसप्ताहाचरणं कृतम्। विश्वविद्यालयस्य कर्मचारिणां छात्राणाञ्च कृते विविधाः भाषणनिबन्धप्रारूपणगीतगायनलोकसंगीतप्रतियोगिताः समायोजिताः। विश्वविद्यालयस्य कर्मचारिणः छात्राः प्रतियोगितासु सोत्साहं भागम् अगृह्णान्। यथाकालं हिन्दीराजभाषासमित्या आवर्षं विविधसंगोष्ठीनाम् आयोजनं कृतम्।

## 10. श्रीलालबहादुरशास्त्री-श्रीमहात्मगांधीजयन्त्युत्सवः

विश्वविद्यालये 2 अक्टूबर 2023 तमे दिनाङ्के श्रीलालबहादुरशास्त्रीमहोदयस्य श्रीमहात्मगांधीमहोदयस्य च जयन्ती आचरिता। सन्दर्भेऽस्मिन् विश्वविद्यालयः प्रतिवर्षं काव्यरूपकादिसंकेतानां प्रचुरताज्ञापनपूर्वकं तत्सम्बद्धघटनानां स्मरणरूपेण तत्तत्प्रचलितधर्मिकग्रन्थानां संरक्षणं पठनपाठनं च करोति। अवसरेऽस्मिन् विश्वविद्यालयपरिसरे शिक्षकैः, गैरशैक्षणिकाधिकारिभिः छात्रैश्च गीतायाः पाठः कृतः।

## 11. स्वच्छताभियानम्

विश्वविद्यालयपरिसरे 01.10.2023 तमात् दिनाङ्कात् 15/10/2023 यावत् विश्वविद्यालयपरिसरे सार्वजनिकस्थानानां गृहाणां वा स्वच्छतायैऽसौ कार्यक्रमः आचरितः। अस्मिन् अवसरे स्वच्छताम् अवधाय माननीयः कुलपतिः अन्यशिक्षकाः शैक्षणिक-अधिकारिणकर्मचारिणश्च परिसरं स्वच्छं कृतवन्तः। अनेन कार्यक्रमेण छात्रेषु, कर्मचारिषु, अधिकारिषु च स्वच्छतां स्वास्थ्यं च प्रति जागरूकता समुत्पादिता। येन महात्मगान्धिनः स्वच्छभारतमिति स्वप्नः पूर्तिं प्राप्नोतु इति।




## 12. खादिमहोत्सवः

अभियानमिदं 02/10/23तः 31/10/23 यावत् समाचरितम्। विश्वविद्यालयस्य कर्मचारिषु, शिक्षकेषु, छात्रेषु च खादीविषये जागरूकता उत्पादिता खादी अर्थव्यवस्था, पारिस्थितिकी, महिला चेत्यादीनां सशक्तीकरणे महत्त्वभूतः। सामान्यजनमानसे युवावर्गे च खादीं प्रति उत्तमभावः क्रयणाय उत्पादितः। छात्राः mygov इत्यत्र पञ्जीकृताः। तदनु उत्साहेन विविधप्रतियोगितासु भागं गृहीतवन्तः।

## 13. मेरी माटी मेरा देश इति अभियानम्

1.10.23तः 13.10.24 अस्मिन् अभियाने विश्वविद्यालये लालबहादुरशास्त्रिणः प्रतिमायाः पुरतः 'अमृतकलशयात्रा' प्रसारिता। विद्यार्थिनः पञ्चप्रणप्रतिज्ञां कर्तुं तत्सम्बद्धचित्राणि (yuva.gov.in) अत्रुसङ्केते स्थापयितुं प्रोत्साहिताः। देशस्य धरिण्या स्वदृढतां स्थापयितुं विश्वविद्यालयस्य विद्यार्थिभिः वृक्षारोपणमपि विहितम्।

## 14. संविधानदिवसः

शिक्षामन्त्रालयभारतसर्वकारस्य निर्देशानुसारं 26/11/2023 दिनाङ्के विश्वविद्यालये संविधानदिवस-समारोहस्य आयोजनं कृतम्। विश्वविद्यालयस्य सम्बद्धानुभागेषु शपथग्रहणसमारोहः समाचरितः। संविधानदिवसः राष्ट्रियविधिदिवसरूपेण आचर्यते। 26/11/1949 तमे वर्षे संविधानसभया संविधानं अङ्गीकृतम्। 26/11/1950तः परिपाल्यते।



## 15. अन्ताराष्ट्रियबाजरादिवसः

बाजरा इत्यस्य उपयोगाय तत्पोषणसम्बद्धलाभानां वर्धनाय विविधशैलीषु भागाय छात्रान् प्रति जागरुकता समुत्पादिता। येन बाजरा इत्यस्य उपयोगः वर्धेत्। खाद्य-कृषि-संघटनैः संयुक्तराष्ट्रेन बाजरा इति स्वास्थ्यस्य पोषणाय पोषणसम्बद्धलाभानां प्रति जागरूकतायै 2023 तमे वर्षे अन्ताराष्ट्रियं बाजरा-वर्षम् प्ल्ड इति रूपेण मान्यता दत्ता। भारतसर्वकारेण 2023 तमे वर्षे अन्ताराष्ट्रियं बाजरा-वर्षरूपेण आयोजनाय प्रस्तावः प्रदत्तः।



## 16. विकसितभारतं /2047 ( युवध्वनिः )

विश्वविद्यालयस्य प्रमुखैः कुलपतिभिः सङ्कायप्रमुखैः जनान्दोलने भागः गृहीतः। यत्रास्माकं माननीयेन प्रधानमन्त्रिणा वीडियो कॉन्फ्रेन्सिंग इति माध्यमेन विकसितभारतम् 2047 "भारत-युवाओं की आवाज" इति कार्यक्रमस्य शुभारम्भः कृतः। अयं भारतस्य इतिहासकालः वर्तते यदा देशः विशिष्टं पदक्षेपं करिष्यति। अयमेव कालः सम्यक् कालः उचितः च कालः इति विचारस्य समारम्भः "अहम्" इत्यनेन भवति। यथा भारतस्य समारम्भः "अहम्" इत्यनेन भवति। विकासस्य प्रयासः स्वयमेव करणीयः भवति। युवशक्तिः परिवर्तनस्य वाहिका भवति परिवर्तनस्य लाभार्थिनी च। प्रधानमन्त्री श्रीनरेन्द्रमोदी प्रत्येकं विश्वविद्यालयानां छात्राणां यूनां च ओजसः विकसितं भारतं प्रति योजयितुं लक्ष्यप्राप्तये तद्दिशि योजनावश्यकतायै बलं प्रदत्तवान्। स्लाइडशो इति माध्यमेन स्वकीय-सत्यभावनाः विकासयितुं विश्वविद्यालयेन छात्रेषु प्रतियोगिताः आयोजिताः।

## 17. दीक्षान्तसमारोहः दीक्षान्तदिवसः

05/12/2023तमे दिनाङ्के छात्रेभ्यः उपाधिप्रदानाय विशिष्टेभ्यः महानुभागेभ्यः सम्मानप्रदानाय दीक्षान्तसमारोहः समाचरितः। अस्मिन् अवसरे भारतस्य सम्माननीया राष्ट्रपतिः श्रीमती द्रौपदी मुर्मू, माननीयः शिक्षामन्त्री श्रीधर्मेन्द्रप्रधानः च भागम् अवहताम्।





## 18. गणतन्त्रदिवसः

26.01.2024 दिनाङ्के विश्वविद्यालयस्य परिसरे गणतन्त्रदिवसः आचरितः। मुख्यभवनस्य समक्षे गणतन्त्रदिवसस्य आयोजनं जातम्। समारोहः प्रातः 10:30 वादने आरब्धः। विश्वविद्यालयस्य कुलपतिः श्रीलालबहादुरशास्त्रिमहोदयस्य प्रतिमायां माल्यार्पणानन्तरं राष्ट्रीयध्वजोत्तोलनं कृतवान्। अस्मिन् अवसरे श्रोतृगणाः राष्ट्रगानं गीतवन्तः। माननीयेन कुलपतिना अस्मिन् समारोहे उत्कृष्टप्रस्तुतिनिमित्तं विश्वविद्यालयस्य राष्ट्रिय-कैडेट-कोर (NCC) छात्राणां कृते स्मृतिचिह्नानि प्रदत्तानि। समारोहे माननीयेन कुलपतिना विश्वविद्यालयस्य शिक्षणेतरकर्मचारिणां कृते उत्कृष्टसेवायै कर्त्तव्यनिष्ठायै च प्रमाणपत्राणि प्रदत्तानि।

## 19. संस्कृतिसमागमः 22/01/24

विश्वविद्यालयेन अन्यविश्वविद्यालयानां प्रमुखाणां साहाय्येन संस्कृतभाषायाः उपयोगितां वर्धयितुं विभिन्नगतिविधीनां व्याख्यानानां च आयोजनं कृतम्।

## 20. राष्ट्रियमतदातृदिवसः, मम प्रथमं मतदानं देशाय

जनवरीमासस्य 25 तमे दिनाङ्के निर्वाचनायोगस्य स्थापनादिवसम् आयस्य समाचर्यते। इयं भारतसर्वकारस्य कश्चन पदक्षेपः। यस्योद्देश्यम् आधिक्येन युवमतदातृणां निर्वाचनाय प्रोत्साहनं प्रदीयते।

## 21. सरस्वतीपूजनमहोत्सवः

विश्वविद्यालये 24.02.2024 तमे दिनाङ्के वसन्तपञ्चमीमुपलक्ष्य सरस्वतीदेव्याः पूजनम् आचरितम्। विश्वविद्यालयस्य कुलपतेः अध्यक्षतायाम्, कर्मचारिवर्गस्य समस्तसदस्यानाम् उपस्थितौ च डॉ. सुन्दरनारायणझा-(वेदविभागाचार्यः) महोदयेन शास्त्रीयपरम्परानुसारं देवीसरस्वत्याः आराधना कृता।

**अवधेयम् - प्रस्तुतं प्रतिवेदनं मूलरूपेण आंग्लभाषया लिखितस्य वार्षिकप्रतिवेदनस्य संस्कृतानुवादः वर्तते। यदि एतस्मिन् काचित् त्रुटिः/विसंगतिः परिलक्ष्यते, तर्हि आंग्ललिखितं वार्षिकप्रतिवेदनं मान्यं भविष्यति।**



# श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः


केन्द्रीयविश्वविद्यालयः

नैकद्वारा 'ए' श्रेण्यां प्रत्यायितः

बी-4, कुतुबसांस्थानिकक्षेत्रम्, नवदेहली-110016

दूरभाषः 011-46060606

ई-मेलसङ्केतः info@slbsrsv.ac.in

वेबसाईटसङ्केतः www.slbsrsv.ac.in